पताकाम्नायः

(भारतराष्ट्रीय-मुद्रापताका-व्यञ्जितार्थ-
व्याख्यानात्मको ग्रन्थः)

आचार्य-श्रीमनोरञ्जनशास्त्रिकृतः

श्रीअभिरामदेवशर्म्मणा सम्पादितः
प्रकाशितश्च
१९६५

पताकाम्नायः

(भारतराष्ट्रीय-मुद्रापताका-व्यञ्जितार्थ-
व्याख्यानात्मको ग्रन्थः)

आचार्य-श्रीमनोरञ्जनशास्त्रिकृतः

ग्रन्थकृत्प्रणीतया जनमनोरञ्जन्याख्यया व्याख्ययोपेतः
पद्मभूषण डाः वेङ्कटराघवार्यरचिताङ्गला-
मुखेनोपबृंहितः

श्रीअभिरामदेवशर्म्मणा सम्पादितः
प्रकाशितश्च

First Edition :

1966

Price : Rs. 5·00 p.

TO BE HAD FROM

The Author,
Sanskrit College
P. O. Nalbari
Dist. Kamrup
Assam

Printed by K. C. Panda, **Mudrani** 71, Kailash Bose Street, Calcutta-6, and published by Shri Abhiram Sharma, Mangaldoi, Assam.

समर्पणम्

परमश्रद्धाभाजन-स्वर्गत-डाः श्रीराधानाथफुकन-वेदान्तवाचस्पति-महाभागानां स्मरणार्थं श्रद्धया समर्पितोऽयं ग्रन्थो भारतवर्षप्रणयिभ्यः सज्जनेभ्यः

जनगणानुविधेयेन
ग्रन्थकृता
मनोरञ्जनशर्म्मणा

योऽसौ वेदान्तवाचस्पतिरमलमतिर्मर्त्त्यलोकात् प्रयातः
श्रीराधानाथनामा मम परमसुहृत् फुकनस्तत्त्वदर्शी ।
मुक्तः स्वर्गस्थितो वा जनगणमनसा स्मर्य्यमाणो महात्मा
ग्रन्थेनैतेन सम्यक् प्रसरतु नितरां प्रीतिमान् स प्रसन्नः ॥

FOREWORD

Sri Pandit Manoranjan Sastri, Principal, Sanskrit College, Nalbari, Assam has been known to me since I first met him during the tours of the Sanskrit Commission. I had corresponded with him about Sanskrit manuscripts in his place and had, from time to time, received from him specimens of his Sanskrit writings, some of which I had published in the pages of the *Samskrita Pratibhā*. He combines erudition in Śāstras with a gift for poetic composition. A major poem of his is on his home country, Assam, called *Prakāma Kāmarūpa*.

The present work of his, to which he has asked me to contribute a foreword, is both poetic and expository and takes for its theme the National Emblem and the Flag of Free India. Ever since the beginning of the national movement and struggle for freedom, patriotic writings in prose and verse had been continuously composed in Sanskrit, even as in the regional languages, as I have shown in my account in *Contemporary Indian Literature* published by the Sahitya Akademi. A good number of these have been on the tricoloured Flag with which the struggle was carried on, and in their poems on the Flag, some writers, including the author of this Foreword, had essayed to bring out the

inner meaning and significance of the three colours. In the present poem, Sri Manoranjana Sastri takes this last mentioned line and gives us a philosophical exposition on the Indian Flag, *Patākā-āmnāya.* To the older Flag, he adds the new National Emblem adopted on the attainment of Independence, the Sarnath Lion Capital. Thus the poem has two parts, devoted respectively to the Emblem and the Flag.

The *Patākā-āmnāya* is in terse anushtubh verses which are elucidated in a prose gloss written in the traditional manner. In the two parts, together, there are one hundred and seventy-one verses. The style of the author is clear, crisp and classical, although there is some occasional archaism.

Symbolism and esoteric interpretation are trends in which the traditional Sanskrit mind always revels. It is this trend that the author pursues in this work. There is no doubt that it is in a spirit of high idealism and with certain symbolic ideas in mind that these two, the Emblem and the Flag, as we have them, were chosen by the leaders. But what the author does here is to expatiate on this symbolism in his own way, on the background of the entire thought and literature in Sanskrit from the Vedas downwards. The abstract ideas signified by the elements comprised in the two sacred national symbols are set forth in the verses and the gloss,

which explains the former, makes numerous apt and striking quotations from the Vedas, the Upanishads, the Bhagavadgita, the Bhagavata etc. The interpretation of the ideas and truths represented by these two are not only virtues of national importance but also religious and spiritual principles for which this country had stood from the most ancient times.

Taking first the Lion Pillar, the author brings out the various ideas of physical and moral strength and grandeur suggested by the four lions, which are always symbols of independence and lordship, courage and fearlessness, strength and striking power (I. 8.). They, accordingly, call upon the Indians to cherish freedom, self-dependence, fearlessness, and self-protection (I. 11-2). The juxtaposition of the four points to mutual friendliness, co-existence and universal love (I. 15). The number four is famous and associated with several ideas in groups of four in Indian thought : i.e. the four means of state-craft *Sāma, Dāna, Bheda, Daṇḍa* (I. 16 ff.). Below these lions is the circle, with a disc in between a bull and a horse. The author equates these two animals and the disc with the concept of Agni and Soma and Yajna, the sacrifice, the offering and that to which the offering is made (I 20 ff.). Indeed the whole world is summed up in this pair of the offering and that to which it is made. The disc or *Cakra* is again a recurring symbol and from the *Yajna-Cakra*, the sacrificial

cycle, in which the whole creation is interlocked in mutual give and take, as set forth in the Gita (I. 22 ff.), the author goes on to other *Cakras.* The pair bull and horse suggest other pairs of ideas as well: the sacrifice and sacrificer, sacrifice and enjoyment, cause and effect, man and woman, union and separation (I. 32 ff.). Even so the Cakra: *Kāla-cakra*, *Jyotis-cakra*, the *Cakra* of creation which the Lord is rotating, the cycle of *Dharma* and *Jnāna*, the round of divine endowments which make one a blessed devotee of the Lord, as set forth in the Bhagavata (I. 64 ff.), Solar and other discs associated with other deities, e.g. the *Sudarsana* of Vishnu, the six Tantric *Cakras* within one's own body and so on. The author relates the *Cakra* and its components the nave, the spokes, the rim, to the tenets of each of the darśanas inclusive of the Jain and the Buddhistic (I. 80 ff). Not only is it related to the Buddhist *Dharma Cakra* but also to the Gandhian spinning wheel, *Carkha.* The bull is the symbol of national prosperity and internal economic well-being and the horse indicates the protective power of the country; internal security and external good relation (I. 95 ff.).

The three colours of the Flag naturally bring up the three-coloured Prakrti or Ajā, Lohita-Śukla-Kṛṣnā. The number three is more recurrent and of more prolific incidence and the author correlates a large number of these triads

of higher ideas with the tricoloured banner e.g. the three paths of *Jnāna*, *Karma* and *Bhakti* and the three Ratnas of the Bauddhas. Indeed the Flag, as a symbol of the country, embodies in its three colurs the synthesis of the Austric, Dravidian and Aryan cultures (II. 20) and the Hindu, Muslim and other communities among the peoples of the country.

While expressing my appreciation of the author's labours on this scholarly poem, I would also like to express the hope that the author will soon publish his other poetic works.

University of Madras
12-2-1965

V. RAGHAVAN

सम्पादकस्य निवेदनम्

पताकाम्नायो नामायं ग्रन्थो ममाग्रजेन पूजनीयाऽचार्यश्रीमनोरञ्जन-शास्त्रिणा द्वादशवर्षेभ्यः प्रागेव रचितः, प्रकाशार्थं यतमानेष्वप्यस्मासु तदुपयोग्यर्थाभावादेतावत् कालं हस्तलिखितावस्थ एवास्थात्। ग्रन्थ-कारस्तु व्याहताशस्तत्प्रकाशायासं परित्यज्यैतद्ग्रन्थस्य सारार्थमसमीय-भाषया निबद्ध्य 'पताकाप्रकाश' नाम क्षुद्रकायं ग्रन्थमेकं निर्मितवान् प्रकाशितवांश्च खीष्टीये १६५६ तमेऽब्दे।

पताकाप्रकाशाख्यस्य तस्य क्षुद्रग्रन्थस्यैतत्प्रान्तीयविद्वत्समाजे समादरं सुप्रचारं च समीक्ष्यैवैषोऽपि ग्रन्थः प्रकाशं गतः भारतीयसज्जन-समाजे समादृतो भवेदिति निश्चित्य वयं पुनरस्य ग्रन्थस्य सम्पादने प्रकाशे च दत्तावधाना उद्युक्ताश्चाभूम।

ततः सौभाग्यवशाद् गुणग्राहिणामसमराज्यिकशिक्षाधिकारश्रीसुरेश-चन्द्रराजखोवा महाभागानां कृपानुकूल्येन राज्यिकाधिशासनस्यौदार्येण च ग्रन्थस्यास्य प्रकाशनार्थं १०००) सहस्रपरिमितं धनं राज्यिकाधिशासन-पक्षत ऋणं लब्धं यतोऽयं सम्भवत्प्रकाशो जातः। तदर्थमसमराज्यिक-शिक्षाधिकारमहाभागा राज्यिकाधिशासनं च शतशो धन्यवादानर्हन्ति।

असमराज्यिक-प्रकाशनपरिषत्सचिवैर्विद्वदग्रेचरैः सुहृद्वरैः श्रीविश्व-नारायण-शास्त्रि एम्, ए, महाभागैः कारितया मुद्रणव्यवस्थया,

गौहाटी विश्वविद्यालयस्थ-संस्कृतविभागीय-प्रधानाध्यापकैः डाः श्रीमुकुन्दमाधव शर्म्म एम, ए, डि, फिल्, काव्यतीर्थ महाभागैः प्रदर्शितेनानुग्रहेणानुकूल्येन च महानुपकारः साधितोऽस्य ग्रन्थस्य प्रकाश-विषय इति प्रीतिपूर्णां कृतज्ञतां तान् ज्ञापयामहे।

ग्रन्थकृतः परमसुहृद्भिर्विश्वविश्रुतकीर्त्तिभिः मद्रपुर (माद्रास्) विश्वविद्यालय-संस्कृतप्राध्यापकैः पद्मभूषण डाः वेङ्कटराघवार्य-महाभागैः

प्रीतिवशाद् रचितेनाङ्गलवाङ्मयेनामुखेन ग्रन्थमिमं पुरस्कृत्याधमर्णीकृता वयं तेभ्यः सश्रद्धं कृतज्ञतां निवेदयामहे ।

कलिकातास्थे चि, आइ, टि वर्त्मनि पि·२८४ संख्यक भवनस्थ-'प्रग्रेसिभ् पाबलिचार्स' इत्याख्यस्य मुद्रणालस्य सहृदयेनाधिकारिणाऽस्य मुद्रणकार्ये विशेषत आग्रहो मनोयोगश्च प्रदर्शित इति तं प्रत्यपि कृतज्ञा वयम् ।

मुद्रणविशुद्धौ कृतप्रयत्नेष्वप्यस्मासु केचन मुद्राकरप्रमादाः सङ्घटिता एवेति गुणैकपक्षपातान् विद्वज्जनान् साञ्जलिप्रणतस्तत् क्षामयेऽहम् ।

प्राणपणं भारतीयशिक्षासंस्कृतिप्रचारैकव्रतेन, यावज्जीवं सुरभारती-सेवापरायणेन विविधविद्याव्यसनिना नानाशास्त्रार्थधनिना रचित उपहृतश्च भारतवासिभ्यः सज्जनेभ्यो ग्रन्थोऽयं सुतरां रोचेत सर्वेभ्यो देशवासिभ्य इति हृदय उपचीयमानं विश्वासमस्माकं सार्थकं करोतु भगवान् परमात्मेति शम् ॥

१०।५।१९६५ इं

विद्वज्जनानुविधेयस्य

श्रीअभिराम शर्मणः

पताकाम्नायविषयानुक्रमणिका

अथ पूर्वार्द्धविषयाः

विषयाः	पृष्ठसंख्या	श्लोकसंख्या
मङ्गलाचरणम्	१—३	१—३
भारतराष्ट्रीय-मुद्रायाः स्वरूपवर्णनम्, मुद्रास्थ-"सत्यमेव जयते" वाक्यसूचितार्थकथनं च	३—४	४—७
मुद्राङ्कित-सिंहचतुष्टय-सूचितार्थकथनम्	४—८	८—१५
सिंहसंहतेः सामादि नीतिप्रत्यायकत्वम्	८—१०	१६—१९
सामान्यरूपेण चक्रसूचितार्थकथनम्	१०—११	२०
वृषाश्व-चक्रसंहत्याः यज्ञस्वरूपव्यञ्जकत्वम्	११	२१
यज्ञस्यावश्यकर्त्तव्यताकथनम्, स्वाभिमतार्थे महाभारतादि शास्त्रसम्मतिप्रदर्शनं च	११—१६	२२—३१
वृषस्य धर्मप्रत्यायकत्वनिरूपणम्	१६	३२
अश्वस्य धर्मसाधनोपस्थापकत्वम्	१६—१७	३३
वृषाश्वयोः त्यागपूर्वक-भोगबोधकत्वम्	१७	३४
तयोः कार्यकारणबोधकत्वं चक्रस्य संसारबोधकत्वं च	१८	३५
प्रजोत्पादनस्य यज्ञरूपत्वं मुद्रायास्तद्-बोधकत्वं च	१८—१९	३६—३७
यज्ञबुद्ध्या युद्धस्यापि कर्त्तव्यताकथनं मुद्रायाः षड्गुणव्यञ्जकत्वं च	१९—२०	३८—३९
मुद्राया जगत्सृष्टि-व्यञ्जकत्वकथनम्	२०—२१	४०—४३
अर्चिरादिमार्गसूचनमुखेन मुद्राया विद्याकर्म-व्यञ्जकत्वम्	२२	४४—४५
वेदोक्त-कालचक्रवर्णनमुखेन मुद्रायास्तद्व्यञ्जक-त्वोपपादनम्	२२—२६	४६—४७
तच्चक्रस्य काल-नियति-सङ्कर्षण-भैरव-रुद्र-ब्रह्म-विष्वादिशब्द-वेद्यत्वम्	२६—२८	४८—५१

विषयाः	पृष्ठसंख्या	श्लोकसंख्या
चक्रस्य श्रौतधर्मप्रतीकत्वम्	२८—२९	५२
चक्रस्य गायत्रीप्रतीकत्वम्	२९—३०	५३—५४
तस्य सम्बत्सरप्रतीकत्वम्	३०—३१	५५—५६
चक्रस्य समग्रजगत्प्रतीकत्वोपपादनम्	३१	५७
चक्रस्य ज्योतिश्चक्ररूपत्वम्	३१	५८
तस्य विराट्पुरुषप्रतिरूपत्वम्	३१—३२	५९—६०
मुद्राया अद्वैतवेदान्त्यभिमतार्थ व्यञ्जकत्वम्	३२—३३	६१—६२
मुद्राया भागवतसम्प्रदायाभिमतार्थव्यञ्जकत्वम्	३३—३५	६३—६७½
मुद्राया शैवादिसम्प्रदायान्तराभिमतार्थ-व्यञ्जकत्वम्	३५—३६	६८—७०
मुद्राया विष्णुचक्रप्रतीकत्वम्	३६—३७	७१—७२
मुद्राया आगमिकादिसम्प्रदायान्तराभिमत-तत्तदर्थव्यञ्जकत्वोपपादनम्	३७—३९	७३—७७
चक्रस्य लौकिक-समयमानसूचनमुखेन सर्व्वकर्म-प्रवर्त्तकत्वम्	३९	७८—७९
चक्रस्य सांख्ययोगसिद्धान्त-व्यञ्जकत्वम्	३९—४०	८०—८१
तस्य वैशेषिकाभिमतार्थ-व्यञ्जकत्वम्	४०—४१	८२—८३
न्यायाभिमतार्थ-व्यञ्जकत्वम्	४१—४२	८४—८५
मुद्राया जैनाभिमतार्थ-व्यञ्जकत्वम्	४२—४३	८६—८७
बौद्धाभिमतार्थबोधकत्वम्	४३—४५	८८—९२
महात्मगान्धिसम्मतार्थ-व्यञ्जकत्वम्	४५—४६	९३—९४
वृषाश्वयोः राष्ट्रवासिकर्त्तव्यव्यञ्जकत्वम्	४६—४७	९५—९६
मुद्राया भारतराष्ट्रप्रतीकत्वोपपादनमुखेन तदर्थोपसंहारः	४७—४९	९३—१००

अथोत्तरार्द्धविषयानुक्रमणिका

विषयाः	पृष्ठसंख्या	श्लोकसंख्या
पताकाया ब्रह्मोपमत्वं तद्गतवर्णत्रयकथनं च	५०—५२	१—२
पताकावयवानां सांख्ययोगाभिमतार्थ-व्यञ्जकत्वम्	५२—५४	३—८½
तस्या औपनिषदाभिमतार्थव्यञ्जकत्वोपपादनम्	५४—५५	९—११
बौद्धाभिमतार्थव्यञ्जकत्वम्	५५—५६	१२—१४
जैनाभिमतार्थव्यञ्जकत्वम्	५६	१५
वैदिकाभिमतार्थव्यञ्जकत्वम्	५६—५७	१६—१८
भारतराष्ट्रस्वरूप व्यञ्जकत्वम्	५७—५८	१९—२२
तस्या भारतवर्षप्रतिरूपत्वम्	५८—५९	२३
भारतवासिजनतास्वरूप-व्यञ्जकत्वम्	५९	२४
भारतीयजनतायाः कर्त्तव्य-व्यञ्जकत्वम्	५९—६०	२५—२६
पताकाया राष्ट्रीय-समित्यभिमतार्थकथनम्	६०	२७—२८
पताकाया माहम्मदेशवीयादिसर्वसम्प्रदायानुमतार्थव्यञ्जकत्वम्	६०—६२	२९—३८
चक्रप्रतीकस्य समग्रपृथिवीवासि-जनताभिमतत्वोपपादनम्	६३—६४	३९—४७
पताकाया उत्थापनादिविधिः	६४—६५	४८—५०
भारतराष्ट्रपतिपताकायाः स्वरूपार्थवर्णनम्	६५—६६	५१—५८
राज्यपालपताकास्वरूपार्थवर्णनम्	६७	५९
सेनाविभागीय पताकास्वरूपार्थवर्णनम्	६७	६०—६२
सेनाध्यक्षप्रधानस्य पताकास्वरूपार्थवर्णनम्	६८	६३—६४
मुद्रापताकयोरर्थबोधकत्वोपपादनम्	६८—७०	६५—६८
ग्रन्थपाठफलम्	७०	६९
ग्रन्थोपसंहारः	७०—७२	७०—७१

सत्यमेव जयते

ॐ नमो गणेशाय

पताकाम्नायः

पूर्वार्द्धम्

—:o:—

ब्रह्मधर्मप्रकाशार्था यस्यामी वेदराशयः

षड्भिरङ्गैर्युताः श्वासा ब्रह्म तच्छ्रेयसेऽस्तु नः ॥१॥

विना येन जगत् सर्वं भवेत् सन्तमसा वृतम् ।

तच्छिवं सुन्दरं सत्यं वन्दे सारस्वतं महः ॥

प्रारिप्सितस्याविघ्नसमाप्तये शिष्टाचारमनुविदधानः पूर्वतनशिष्टरचितेनैव पद्यद्वयेन मङ्गलमाचरति ब्रह्मधर्मेति । बृहत्त्वाद् बृंहणत्वाच्च सनातन-वैदिकधर्म एव ब्रह्मधर्मः, तादृशस्य तस्य प्रकाश एवार्थः= प्रयोजनं येषां ते तथा ।

अथवा ब्रह्म च धर्मश्च, तयोः प्रकाशः=प्रमितिरेवार्थः=प्रयोजनं येषां ते तथा; "शास्त्रयोनित्वादि"ति—[शारीरक सू:—१।१।४], "चोदनालक्षणोऽर्थो धर्म" इति च [जैः सूः १।१।२] न्यायात् । वेदराशयः=ऋग्यजुःसामाथर्वाणः । षड्भिरङ्गैरिति । शिक्षा-कल्प-व्याकरण-निरुक्तच्छन्दोज्योतींषि षड्वेदाङ्गानि । एतेन विद्यान्तराणामप्युपलक्षणम् । तैः सहिता वेदराशयः, यस्य परमात्मनः श्वासाः-श्वासरूपेण निर्गताः । "स यथार्द्रैधाग्नेरभ्याहितात् पृथग्धूमा

विशुद्धज्ञानदेहाय त्रिवेदी-दिव्यचक्षुषे ।
श्रेयःप्राप्तिनिमित्ताय नमः सोमार्द्धधारिणे ॥२॥

विनिश्वरन्त्येवं वा अरे अस्य महतो भूतस्य निश्वसितमेतद् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि सर्वाणि निश्वसितानी"ति श्रुतेः। [बृः आः उः २।३।१०]। तद् ब्रह्म = अद्वितीयः परमात्मा, नः = अस्माकं श्रेयसे = मङ्गलाय अस्तु ॥ १ ॥

विशुद्धेति। विशुद्धौ = दोषस्पर्शरहितौ ज्ञान-देहौ यस्य स तथोक्तः। विशुद्धं हि भगवतो ज्ञानं ज्ञानकरणेषु रागादिदोषस्पर्शासम्भवात्, देहश्चायोनिजत्वाद् गर्भवेदनादिक्लेशास्पर्शाच्च। त्रिवेदी = वेदत्रयम् ऋग्यजुश्छन्दांसि यस्य दिव्यचक्षुरिवातीन्द्रियविषयकासन्दिग्धाविपरीतस्पष्टज्ञानसाधनत्वात्। श्रेयसश्च हिताहितप्राप्तिपरिहारात्मनः प्राप्तिनिमित्तं भगवान्। तस्मै सोमार्द्धधारिणे = चन्द्रकलाधारिणे शिवाय नमः। अथवा सोमम् = उमया वामार्द्धभूतया युक्तमर्द्धं शरीरं तद्धारिणे अर्द्धनारीश्वराय नम इत्यर्थः।

अथवा उमया सह वर्त्तमानः सोमः = शिवः, स एवार्द्धं शरीरं तद्धारिणे हरार्द्धदेहाय हरिहरात्मने नम इत्यर्थः।

अथवा सा लक्ष्मीः "सा स्त्री, गौरी लक्ष्मीरिति शब्दरत्नावली"ति शब्दकल्पद्रुमदर्शनात्। सा च उमा च सोमे, ताभ्यां घटितमर्द्धं वामार्द्धं ययोः तौ सोमार्द्धौ = हरिहरात्मकौ तद्धारिणे हरिहरात्मकाय परमात्मने इत्यर्थः। देहदेहिनो र्भेदेनाधाराधेयविवक्षोपपत्तिः।

अथवा सा = प्रसिद्धा मूलप्रकृतिर्मायेति यावत्। उर्महेश्वरः, मः = प्रजापतिर्ब्रह्मेति यावत्। अः विष्णुः—

"अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः।
मकारस्तु स्मृतो ब्रह्मा प्रणवस्तु त्रयात्मकः" ॥

विद्या वीर्यवती येन वृत्तिः शौर्यवती तथा।
नमोऽस्तु कर्मयोगाय स्वातन्त्र्याभयभूमये ॥३॥
मुद्रा भारतवर्षस्य प्रतिमात्वेन गृह्यते।
यथा तद्भारतं वर्षं मुद्रायां निहितं ध्रुवे ॥४॥

इतिस्मृतेः। साच उश्च मश्च अश्चेति सोमाः=तएवार्द्धमर्द्धांशमिव तद्धारिणे निर्विशेषाय निर्गुणाय ब्रह्मणे इत्यर्थः। तादृशस्य ब्रह्मणो निरवयवत्वेऽपि सगुण निर्गुणतया भागद्वयं कल्पितमुपासनासिद्ध्यर्थं "त्रिपादूर्द्धमुदैत् पुरुष"—इतिवत् संगच्छते।

अथवा, विशुद्धं=मीमांसया संशोधितं ज्ञानमेव देहो यस्य; त्रिवेद्येव दिव्यं चक्षुः स्वरूपप्रकाशकं यस्य, सोमो हविस्त्यज्यमानद्रव्यमिति यावत्। सोमएवार्द्धं=सोमार्द्धं, द्रव्य-देवतयोर्यागस्वरूपत्वेन देवताया अपरार्द्धरूपत्वम्।

यद्वा अग्नी-षोमयोर्यज्ञात्मकताया वक्ष्यमाणत्वेन अग्नेरपरार्द्धघटकतया सोमस्य तदर्द्धरूपत्वसिद्धेः। तद्धारिणे; श्रेयसः=काम्यफलस्य प्राप्तिनिमित्तमपूर्वद्वारेण फलजनकः; तस्मै=यज्ञाय नम इत्यर्थः। एवं चक्रात्मतया यज्ञस्यापि प्रबन्धाभिधेयत्वं सूचितं भवति ॥ २ ॥

राष्ट्रसमृद्धिभूतस्य कर्मणो नमस्कारच्छलेन तद्धेतुभूतान् गुणानभिधाय कर्मणः श्रैष्ठ्यमाह विद्यावीर्यवतीयेनेति। "वीर्यवती तथा स्याम्" [निरुक्तम्] इति श्रुतौ, "यथा स्यां वीर्यवत्तमे"ति स्मृतौ [मनुः २।११४] च निर्वीर्याया विद्याया अकिञ्चित्करत्वावगमात्, तद्वीर्यहेतुतया कर्म्मणः प्रशस्यतरत्वमेतेनोक्तं भवति। तथा वृत्तिर्व्यापारः प्रजीवनं वा, तच्च कर्मणा शौर्यवत्=पौरुषसूचकं भवति; पौरुषहीनं जीवनं न प्रशस्यत: इति तद्धेतुतया कर्मणोऽभ्यर्हितत्वम्। स्वातन्त्र्यमभयं च कर्मनैपुण्यनिमित्तमेवेति स्पष्टम्। तादृशाय कर्मयोगाय नम इत्यर्थः ॥ ३ ॥

चतुराशामुखाः सिंहाः पृष्ठैर्युक्ताः परस्परम् ।
उत्तानदेहदण्डास्ते स्थिताश्चोद्धतकेशराः ॥५॥
तदधश्चक्रमेकं तु नाभि-नेमियुतं शुभम् ।
चतुर्विंशतिसंख्यारं वृषाश्वौ तस्य पार्श्वयोः ॥६॥

श्रोतॄणामवधानाय विवक्षितं प्रतिजानीते मुद्रेति। भारतवर्षस्य प्रतिमात्वेन यादृशी मुद्रा देशवासिभिर्विद्वद्भिर्गृह्यते तदेतादृशं सुबृहद् भारतवर्षं येन प्रकारेण मुद्रायां निहितम् अतिक्षुद्रया मुद्रया बुद्ध्यारूढं भवति तद् ब्रुवे। मुद्राशब्देन पताकाया अप्युपलक्षणम् ॥ ४ ॥

मुद्रायाः स्वरूपमाह चतुराशेत्यादिना त्रयेण। चतुराशामुखाः= पूर्वपश्चिमोत्तरदक्षिणदिगभिमुखाः चत्वारः सिंहाः=सिंहाकृतयः; कीदृशास्ते ? उत्तानदेहदण्डाः परस्परं पृष्ठैर्युक्ताः=परस्परं लग्नपृष्ठदेशाः सन्तो दण्डायमाना इत्यर्थः। उद्धतकेशराः=ऊर्द्धोत्क्षिप्तजटाश्च सन्तो मुद्रायां दृश्यन्त इतिशेषः ॥ ५ ॥

तदध इति। तेषां सिंहानामधस्तादेकं चक्रमास्ते। कीदृशं तच्चक्रमित्याह नाभिनेमियुतमिति। चक्रस्य मध्यकेन्द्रं नाभिः, बहिर्वेष्ठनं च नेमिः; ताभ्यां घटितरूपमित्यर्थः। पुनः कीदृशं तदित्यत आह चतुर्विंशतिसंख्यारमिति। चतुर्विंशतिसंख्यका अराः[1]=नाभिनेम्योः संयोगशलाका यस्य तत्तथा। वृषाश्वाविति। तस्य चक्रस्य पार्श्वयोः= वामपार्श्वे वृषाकृतिः दक्षिणपार्श्वे चाश्वः=अश्वाकृतिः अङ्कितौ स्त इति शेषः ॥ ६ ॥

१। अर शब्दस्य त्रिषु लिङ्गेषु प्रयोगो दृश्यते यथा :—
"अरं शीघ्रे च चक्राङ्गे"—इति मेदिनी।
"अरैः सन्धार्यते नाभिः नाभौ चाराः प्रतिष्ठिता"। इति पञ्चतन्त्रे।
"विंशति प्रत्यराभिरिति"—श्वेताश्वतरोपनिषदि।

तदधश्चाङ्कितं श्रौतं सत्यस्य जयघोषणम् ।
येन सत्यप्रतिष्ठत्वं राष्ट्रस्याङ्गीकृतं भवेत् ॥७॥

स्वातन्त्र्यमभयं वीर्यं शौर्यं चेति चतुष्टयम् ।
संहतैर्हरिभिर्ज्ञेयं स्वतस्तद्गुणवत्त्वतः ॥८॥

न पराहृतमादत्ते भुङ्क्ते स्वोपार्जितं सदा ।
आकृत्या भीषयत्येष न बिभेति कुतश्चन ॥९॥

तदध इति । तच्चक्रस्याधस्तात् श्रौतम्=

"सत्यमेव जयते नानृतं
सत्येन पन्था विततो देवयानः ।
येन क्रमन्त्यृषयो ह्याप्तकामा
यत्र तत् सत्यस्य परमं निधानम् ॥" [मु: उः ३।१।६]

इति मुण्डकश्रुत्याम्नातं सत्यस्य जयघोषणम्="सत्यमेव जयते"—इति वाक्यमङ्कितमास्ते । तेन किं स्यादित्याह येनेति । तादृशश्रुतिवाक्येन राष्ट्रस्य=भारतराष्ट्रस्य सत्यप्रतिष्ठत्वं=सत्यैकनिष्ठत्वमङ्गीकृतं=स्वीकृतं भवेदित्यर्थः ॥ ७ ॥

तत्राङ्कितैश्चतुर्भिः सिंहैः संकेतितमर्थमाह स्वातन्त्र्यमिति । स्वातन्त्र्यं =स्वाधीनभावेन प्रजीवनम् । अभयं=भयराहित्यम् । वीर्यमात्मरक्षणसामर्थ्यम् । शौर्यं=पराक्रमहेतुभूतं पौरुषम् उत्साह इति यावत् । हरिः=सिंहः । स्वतः=स्वभावतः । तद्गुणवत्त्वतः=स्वातन्त्र्यादिगुणचतुष्टयवत्त्वात् । निरुक्तं सिंहस्य गुणचतुष्टयं सहजातम् । अतस्तैर्मिलितभावेनावस्थितैश्चतुर्भिः सिंहैः तद्गुणचतुष्टयमस्मिन् राष्ट्रे राष्ट्रवासिषु च मिलितभावेनावस्थितं सूच्यत इत्यर्थः ॥ ८ ॥

सिंहस्य स्वातन्त्र्यगुणवत्त्वं दर्शयति "न पराहृतमादत्त" इति । यतः

आत्मानमात्मशक्त्यैव रक्षत्यन्यानपेक्षया ।
तथैवात्मद्विषो जित्वा स शेते गिरिमूर्द्धनि ॥१०॥

एवं भारतराष्ट्रस्थाः स्वतन्त्राश्चापरिग्रहाः ।
स्वावलम्बाश्च जीवेयुर्नबिभीयुः कुतश्चन ॥११॥

स्वेतरनिरपेक्षाश्च स्ववीर्येणात्मरक्षणे ।
समर्था द्विषतः शत्रून् जयेयुः स्वबले स्थिताः ॥१२॥

स्वातन्त्र्याभय-शौर्याणां वीर्यस्यापि च सर्वथा ।
सर्वत्र समयोगेन सर्वेषां सङ्गतिर्भवेत् ॥१३॥

स परोपार्जितं खाद्यादिकं सदा=प्राकृतावस्थायां, न गृह्णाति अपितु स्वयमेवोपार्ज्याभ्यवहरति ; इत्यतः तस्य स्वातन्त्र्यं सहजातमिति मन्तव्यम् । अभयं साधयति आकृत्येति । अस्य घोरमूर्त्तिमवलोक्य सर्वे सन्त्रस्ता भवन्ति न चायं कस्मादपि त्रस्यतीत्यर्थः ॥ ९ ॥

वीर्यवत्तां साधयति आत्मानमिति । शौर्यवत्त्वमाह तथैवेति । अतिरोहितार्थं सर्वम् ॥ १० ॥

सिंहाः किल मुद्राङ्किताः स्वातन्त्र्यादिगुणचतुष्टयोपस्थापनेन भारतराष्ट्रस्थानां जनानां तद्गुणवत्त्वं सम्भावितं व्यञ्जयन्तीत्याह एवमिति द्वयेन । स्पष्टोऽर्थो न व्याख्यानमपेक्षते ॥ ११—१२ ॥

प्रतिव्यक्त्येतेषां चतुर्णां गुणानां सद्भावेन किं स्यादित्याह स्वातन्त्र्याभयशौर्याणामिति सार्द्धत्रयेण । जनेषु प्रत्येकं गुणचतुष्टयस्य परस्परानुकूल्येन=परस्पराविरोधेन समभावेन च सत्त्वात् सर्वेषां जनानां शक्तिसाम्यं, ततः चरित्रसाम्यं, ततश्च सर्वेषां सहयोगः, ततः

सर्वेषामैकमत्यं च सर्वात्मैक्यमथापि वा ।
स्वात्मभिन्नो नैव तिष्ठेन्नद्वेष्टा न परस्तथा ॥१४॥
न जेयो न जयार्थी च बाध्यो बाधक एव वा ।
चतुर्णां समभावेन परस्परानुकूल्यतः ।
गुणानां युगपत् स्थित्या प्रीतिः सर्वत्र राजताम् ॥१५॥

परस्परैकमत्यम्, हृदयवचन-मनस्कामानां साम्यं च ऋक्श्रुत्युक्तं भवेदिति हृदयम् । तथा च श्रुतिः :—

"संगच्छध्वं संवदध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे संजानाना उपासते ॥
समानो मन्त्रो समितिः समानी
समानं मनः सहचित्तमेषाम् ।
समानं मन्त्रमभिमन्त्रये वः
समानेन वो हविषा जुहोमि ॥
समानी व आकूतिः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ॥"

[ऋग् सं १०।१९१।२—४]

इति । एवं च श्रुत्युक्तसमभावे सति स्वात्मभिन्नः=स्वभावविरुद्धः परत्वेनाभिमतः, अतएव द्वेष्टा जेयादिश्च न तिष्ठेत् । एवं च सति प्रीतिः=परस्परं प्रेमा सुखं चावश्यम्भावीत्यर्थः । तेन तथावस्थितैः सिंहैरन्ततो गत्वा सर्वेषां भारतवासिनां साम्यं मैत्री प्रीतिश्च सङ्केतेनोपदिश्यन्त इति ध्येयम् ॥ १३—१५ ॥

पुनरप्येतादृशसंस्थानाः सिंहाकृतय एव राष्ट्ररक्षार्थमपेक्षितानां

साम दानं च भेदश्च दण्डश्चेति चतुर्विधा ।
नीतिः परस्परापेक्षा सिंहसंहतिलक्षिता ॥१६॥

चतुर्विधानां शत्रुवशीकरणोपायानां प्रयोज्यतां स्मारयन्तीत्याह सामदानं च भेदश्चेति । प्रियवाक्यविशेषः साम ; यथाह कामन्दकः—

"वागनुद्वेगजननी सामेति परिकीर्त्त्यते ।
सामाख्यं सुनृतं सत्यं प्रियं स्तोत्रं च कीर्त्यते ॥"

[काः नीः १७।१६]

इति । द्विविधं साम तथ्यमतथ्यं चेति । तत्र तथ्यात्मकं साम साधुना साधून् प्रति प्रयोज्यं भवति । अतथ्यं त्वसाधुना असाधुं च प्रति प्रयुज्यते । तथाच मत्स्यपुराणम् :—

"द्विविधं कथितं साम तथ्यं चातथ्यमेव च ।
ततोऽप्यतथ्यं साधूनामाक्रोशायैव जायते ॥
महाकुलीना ऋजवो धर्मनिष्ठा जितेन्द्रियाः ।
सामसाध्या नरास्तथ्यं तेषु साम प्रयोजयेत् ॥" इति ।

[मत्स्य पुः २२२।३, ४]

दानं प्रसिद्धम् । साम्ना वशीकर्त्तुमशक्यान् बलाधिकान् साधुस्वभावानरीन् दानेनापि वशमानयेदिति राजधर्मविदां समयः । यथाह कामन्दकः—

"आत्मनो विषयमिव कुर्वन्दद्यात् समाहितम्" । इति ।

[काः नीः १७।१७]

"दारुणं विग्रहं विद्वान् दानेन प्रशमं नयेत् ।
इन्द्रोपचारे शुक्रस्य दानेन शममीयिवान् ॥" इति च ।

[काः नीः १७।१६]

येनोपायेनारिपक्षीयानामेव मध्ये परस्परमविश्वासो विरोधो वा जायते स भेदः । तदुपायस्य प्रयोगेणापि बलाधिका अपि शत्रवो वशमानेतुं शक्याः तथाचोक्तं कामन्दकीय-नीतिसारे—

पृष्ठानां समसंयोगात् सामनीतिः प्रतीयते ।
तिर्यग्गामिस्वभावस्य त्यागेन दण्डवत् स्थितेः ॥१७॥

"भेदं कुर्वीत यत्नेन मन्त्र्यमात्य पुरोहितान् ।
तेषु भिन्नेषु भेदेहि युवराजे तथोर्जिते ॥ इति [काः नीः १७।२५]
भेदं कुर्वीत मतिमान् विगृहीतो वलीयसा ।
षण्डामार्कौ सुरैर्भित्त्वा बलवन्तौ पराजितौ" ॥ इति च ।
[काः नीः १७।३६]

दण्डो नाम स्वराष्ट्रसंरक्षण-परराष्ट्रवशीकरणोपायो धर्मविशेषः । तथा चोक्तं महाभारते राजधर्मे :—

"यस्मिन् हि सर्वमायत्तं स दण्ड इह केवलः ।" इति ।
[शाः पः १२१।८]

तथा—"दण्डे त्रिवर्गः सततं सुप्रणीते प्रवर्त्तते ।
दैवं हि परमो दण्डो रूपतोऽग्निरिवोत्थितः ॥
नीलोत्पलदलश्यामश्चतुर्दंष्ट्रश्चतुर्भुजः ।
अष्टपान्नैकनयनः शङ्कुकर्णोर्द्धरोमवान् ॥
जटी द्विजिह्वस्ताम्रास्यो मृगराजतनुच्छदः ।
एतद्रूपं बिभर्त्युग्रं दण्डो नित्यं दुराधरः ॥ इति
[शाः पः १२१।१४-१६]

दण्डस्य निरुक्तरूपत्वं चैतद्व्याख्यानमुखेन नीलकण्ठचतुर्द्धुरिभिरुपपादितं भारतभावदीपे ; विस्तरभयान्नेह वितन्यते । एते चतुर्विधा उपायाः परस्परापेक्षत्वेन प्रयुक्ता दुर्द्धर्षानपि शत्रून् वशमानयन्तीति राजशास्त्रविदां सिद्धान्तः । तएवोपायाः सिंहसंहतिलक्षिताः मुद्राङ्कितसिंहचतुष्टयस्य परस्परं लग्नपृष्ठभावेनावस्थित्या व्यज्यन्त इत्यर्थः ॥ १६ ॥

तत्र केन संस्थानेन कतम उपायो व्यज्यत इति तद्विभज्य दर्शयति पृष्ठानामित्यादित्रिभिः । पृष्ठानां यः समभावेन संयोगः तेनैव व्यज्यमाना

दाननीतेः प्रयोगेण शमो राष्ट्रस्य गम्यते ।
इतरेतरवैमुख्याद् भेदनीतिः प्रकाशते ॥१८॥
व्यात्त-करालवदनैरुग्रैर्विस्फारिताक्षिभिः ।
राष्ट्रस्योद्यतदण्डत्वं जाग्रद्रूपं च सूच्यते ॥१९ ॥
तदधोऽवस्थितं चक्रं महोक्ष-हयमध्यगम् ।
अग्नीषोमान्वितं सर्वं यज्ञरूपं प्रवर्त्तते ॥२०॥

प्रीतिरन्ततो गत्वा सामनीतिमुपस्थापयतीति भावः। तिर्यग्गामिस्वभावस्येति। सिंहः स्वभावत एव तिर्यग्गामी जन्तुः अत्र तु दण्डवदवस्थित्या प्रतीयमानेन तिर्यग्गमनस्वभावस्य परिहारेण त्यागात्मिका दाननीतिस्तत् पश्यतां जनानां बुद्धिमारोहति। एवं प्रणाल्या राष्ट्ररक्षार्थं दाननीतिप्रयोगस्य कर्त्तव्यताऽपि प्रतीतिगोचरो भवेदित्यभिप्रायः। इतरेतरेति। परस्परं वैमुख्यस्य भेदव्यञ्जकत्वं स्पष्टमेव। तथैव सिंहानां व्यात्तकरालवदनैर्विस्फारितनयनैश्चाभिव्यञ्जिताभ्यामुद्यतदण्डत्वजागरूकत्वाभ्यामेतद्राष्ट्रस्याजेयत्वं प्रतिपादितं भवति। तथा च राजधर्मेः—

"नित्यमुद्यतदण्डः स्यान्नित्यं विवृतपौरुषम्।
अच्छिद्रश्छिद्रदर्शी च परेषां विवरानुगः॥" इति

[शाः पः १३४।७]

"गृध्रदृष्टिर्बकालीनः श्वचेष्टः सिंहविक्रमः।
अनुद्विग्नः काकशङ्की भुजङ्गचरितं चरेत्" ॥ इति च।

[शाः पः १४०।६२]

॥ १७-१९ ॥

इदानीं मुद्राङ्कितेन वृषाश्वसमन्वितेन चक्रेण सङ्केतितमर्थं प्रतिपादयति तदध इति। महोक्षा वृषभः; हयः=अश्वः; तयोर्मध्यगतं चक्रं यत्

अश्वोऽग्निर्वृषभः सोम आधाराधेयभावतः ।
आभ्यां सम्पद्यते यज्ञो यस्मादिष्टफलं लभेत् ॥२१॥
अग्निः सोमेन संयुक्त एकयोनित्वमागतः ।
अग्नीषोममयं तस्माज्जगदेतच्चराचरम् ॥२२॥

[मः भाः, शाः पः, ३४१।५८]

तत् । अग्नीषोमान्वितमिति । अग्निसोमशब्दयोर्देवताद्वन्द्वेनाभिधया-देवतावाचकत्वेऽपि लक्षणया होमाधारभूतस्याग्नेः सोमशब्दप्रतिपाद्यस्य हविषश्चोपस्थापकत्वं न व्युत्पत्तिविरुद्धम् । तेनाग्निराहवनीयादि-होमाधारः ; सोमः = सोमोपलक्षितं हवनीयद्रव्यमात्रम् । अथवा अग्निः = अग्निशब्दोपलक्षिता देवता ; सोमो = हवनीयं द्रव्यम् ; ताभ्यामन्वितं = घटितस्वरूपं सर्वं यज्ञरूपं = देवतोद्देश्यकद्रव्यत्यागात्मकं ; प्रवर्त्तते = वस्तुतः सम्पद्यत इत्यर्थं प्रतिपादयतीति शेषः ॥ २० ॥

वृषभाश्वाभ्यां सङ्केतितयोः सोमाग्न्योः यज्ञस्वरूपघटकतां वर्णयन्नाह अश्वोऽग्निरिति । अश्वरूपेणाग्निः प्रतीयते "अश्वं नत्वा वारवं तं वंदध्या अग्निं नमोभिः ।" [ऋक् सं १।६।२७] इत्यादि श्रुत्याग्नेरश्वोपमत्व प्रतीतेः । वृषरूपेण च हविः प्रकृतिभूतेन हविष्ट्वसामान्यात् कामवर्षणेन च वृषशब्दोपस्थाप्यत्वात् ; "पयो वै सोमः"—[तैः सं २।५।५] "वृषा सोम द्युमानसि"—[तैः सं ४।२।११] इत्यादि श्रुतेश्च सोमः प्रतीयते । अग्निः किल सोमाधारः, सोमश्चौषधिरसरूपं हविराधेयम् । तद्रूपेण तयो र्यज्ञसम्पादकत्वं यज्ञाच्चाभिप्रेतफललाभो भवतीत्युक्तं भवति ॥२१॥

यज्ञात्मतयाग्नीषोमयोश्चराचर-जगदुपादानत्वं महाभारतोक्तमुपन्यस्य वृषाश्वाभ्यामन्वितं चक्रमग्नीषोमकारणकस्य समग्रजगतः प्रत्यायकं भवतीति प्रतिपादयति अग्निः सोमेनेति । अग्निराहुतिप्रक्षेपाधारो वैश्वानरात्मा वा, सोमेन = हविषा आधेयेन अन्नेन वा संयुक्तः = यज्ञे

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥२३॥

[मनुः सं ३।७६]

सह यज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥२४॥

पुरुषे वा भोक्तरि यथायोगं परस्परं सम्बद्धः सन्; एकयोनित्वं = यज्ञरूपेण पुरुषरूपेण वा कारणभावम्, आगतः = प्राप्तः । ततश्च जगज्जायत इतिशेषः । तस्मादेतच्चराचरं = कृत्स्नं जगत् अग्नीषोममयम् = अग्नीषोमयोः कार्यमिति मन्तव्यम् । पुरुषसूक्तोक्तो यज्ञात्मा जगत्सृष्टेर्निमित्तोपादानभूतो भगवान् पुरुषश्चानेन ज्ञातव्यः तदुक्तम् —

"अग्नीषोमाविदं सर्वमिति यश्चानुपश्यति ।
न च संस्पृश्यते भावैर्यद्भूतैर्मुक्त एव सः ॥" इति ।

[मः भाः, शाः पः, २८८।३३]

एव चेदं मुद्राङ्कितं चक्रमग्नीषोमकारणकं यज्ञचक्रं जगच्चक्रं च मन्तव्यमितिभावः ॥ २२ ॥

जगद्यज्ञयोः कार्यकारणभावेन चक्रवत् परिवर्त्तमानत्वं प्रतिपादयति भगवन्मनुवचनोपन्यासेन अग्नौ प्रास्ताहुतिरिति । अश्वाकृत्या निर्देशितेऽग्नौ आधारभूते, सम्यक् = यथाविधि, प्रास्ताहुतिः = प्रक्षिप्तो वृषाकृत्या दर्शितः हविरात्मा सोमः; चक्राकृत्या निदर्शितमादित्यम्, उपतिष्ठते = प्राप्नोति । तत आदित्याद् वृष्टिरूपेण जायते; वृष्टेश्चान्नं भवति; ततोऽन्नात् प्रजा जायन्ते । प्रजातः पुनरप्यग्नावाहुतिः प्रवर्त्तते इत्येवं चक्रवन्नित्यं परिवर्त्तत इति भावः ॥ २३ ॥

भगवद्गीतावाक्येनापि कर्मानुष्ठानस्यावश्यकतां प्रतिपादयन् यज्ञजगतोश्चक्रवदावर्त्तनं दर्शयति सह यज्ञा इत्यादिना ।

देवान् भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥२५॥
इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः ।
तैर्दत्तानप्रदायैभ्यो यो भुंक्ते स्तेन एव सः ॥२६॥
यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्विषात् ।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥२७॥

यज्ञैः सहिता एव प्रजाः सृष्ट्वा प्रजापतिरेवमनुशास्ति स्म यत् अनेन =यज्ञेन, प्रसविष्यध्वं =प्रसवो बृद्धिरुत्पत्तिरिति यावत्; तां कुरुध्वम् । एष यज्ञः वो =युष्माकम्; इष्टकामधुक् =अभिप्रेतफलसाधनं भवेदिति। तेन यज्ञस्य प्रजाबृद्धिहेतुत्वं प्रजायाश्च यज्ञकर्त्तृत्वनियम इत्युक्तम् ॥ २४ ॥

कथं यज्ञः कामसाधनमित्याह देवानिति। देवताराधनभूतेनानेन यज्ञेन देवान् भावयत =सम्बर्द्धयत। ते देवाश्च वो =युष्मान् तत्कर्मफलदानेन भावयन्तु =सम्बर्द्धयन्तु। एवं परस्परं भावयन्तो यूयं परं श्रेयो मङ्गलरूपम् अवाप्स्यथ ॥ २५ ॥

यज्ञाकरणे सहेतुकं प्रत्यवायमप्याह इष्टानिति। हि =यतः, यज्ञभाविताः =यज्ञेनाराधिता देवाः, वः =युष्मभ्यम्, इष्टान् भोगान् दास्यन्ते; अतः तैर्देवैः दत्तानन्नादीन् भोगान्, एभ्यो =देवेभ्यः, अप्रदाय यज्ञेष्वदत्वा यो भुंक्ते स स्तेन एव =चौरवद्दण्डार्ह एवेति भावः ॥ २६ ॥

यज्ञानुष्ठानस्यावश्यकतामेव स्पष्टयन् तत्फलमाह यज्ञेति। दैवादियज्ञान् निर्वर्त्त्य तदवशिष्टभोजिनः सन्तः सर्वकिल्विषैः =सर्वपापैः मुच्यन्ते। ये तु पापाः =पापकारिणः, आत्मकारणात् =केवलमात्मतृप्तिहेतोरन्नादिकं पचन्ति ते अघं =पापमेव भुञ्जते ॥ २७ ॥

अन्नाद् भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।
यज्ञाद् भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ।२८।।
कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् ।
तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ।।२६।।

यज्ञानुष्ठानस्य जगच्चक्रप्रवृत्तिहेतुतामाह अन्नादित्यादि द्वयेन । अन्नाद् भुक्ताद् रेतोलोहितादिरूपेण परिणताद्, भूतानि = प्राणि-शरीराणि, भवन्ति = जायन्ते । अन्नसम्भवः = व्रीह्याद्यन्नस्य जन्म ; पर्जन्याद् = वृष्टेः । पर्जन्यस्य यज्ञादग्निहोत्रादियज्ञापूर्वात् । यज्ञः पुनः धर्माख्यः कर्मसमुद्भवः = अग्नीषोमसाध्यात् कर्मणो भवति । तच्चाग्नीषोम-सम्बन्धात्मकं कर्म ब्रह्मोद्भवम् = ब्रह्म = वेदः तज्जन्य ज्ञानं वा ; स एवोद्-भवः = प्रमाणं यस्येति तत् वेदैकगम्यमित्यर्थः ; इत्येवं जानीहि । तच्च ब्रह्म वेदाख्यं वैदिकज्ञानं वा अक्षरसमुद्भवम् = अक्षरात् परमात्मनो निर्दोषात् पुरुषनिश्वासन्यायेनाबुद्धिपूर्वं समुद्भव आविर्भावो यस्य तत्तथा । एवं चापौरुषेयत्वेन निरस्तसमस्तदोषाशङ्कं वेदवाक्यं प्रमिति-जनकतयातीन्द्रियार्थे प्रमाणमितिभावः । तस्मात् साक्षात् परमात्म-समुद्भवत्वात् सर्वगतं = सर्वप्रकाशकं, नित्यमविनाशि च ब्रह्म = वेदाख्यं ज्ञानं यज्ञे धर्माख्ये कर्मण्येव प्रतिष्ठितं = तात्पर्य्येण बोधकतयाऽन्वितम् । अतो यज्ञात्मकं कर्मानुष्ठानं सर्वथा कर्त्तव्यमिति हृदयम् । एवं यज्ञशब्देन विभिन्नधर्मावलम्बिनां सर्वेषामेव तत्तदागमविहितपुण्यकर्मणां ग्रहणात् महम्मदीय-यिषवीयादिभिरप्येष एवार्थो ग्राह्यः स्यात् स्वाभिमतेश्वरो-द्देश्यकद्रव्यत्यागात्मनः कर्मणः तैरप्यभ्युपगतत्वात् । तेषां मतेऽप्यश्वेन द्रव्यत्यागोद्देशविषयस्य तत्त्यागजन्यप्रीतिभागित्वेनोद्देश्यस्यैवेश्वरादेः वृषेण च त्यज्यमानद्रव्यस्योपस्थापनसम्भवात् ॥ २८-२६ ॥

कर्मकर्त्तव्यताविधिमुपसंहरन्नाह एवमिति । आदौ परमेश्वराद्

एवं प्रवर्त्तितं चक्रं नानुवर्त्तयतीह यः ।
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥३०॥

[गीः ३।१०—१६]

इत्येवं भगवानाह यज्ञगच्चक्रमव्ययम् ।
अग्नीषोमात्मके यज्ञे तच्च नित्यं प्रतिष्ठितम् ॥३१॥

वेदागमाविर्भावः ; ततः कर्मपरिज्ञानं, ततः कर्मानुष्ठानम् ; ततो धर्मोत्पादः, ततः पर्जन्यः, ततोऽन्नम् ; ततो भूतानि ; पुनस्तथैव भूतानां कर्मप्रवृत्तिरित्येवं परमेश्वरेण प्रवर्त्तितं चक्रं=चक्रवत् परिवर्त्तमानं जगन्निर्वाहकं कर्मपारम्पर्यं य इन्द्रियारामो=विषयासक्तो जनो नानुवर्त्तयति=स्वस्ववेदागमविधिना नानुसरति नानुतिष्ठतीति यावत् ; स अघायुः=पापजीवनः मोघं व्यर्थमेव जीवति। यस्तु कर्म कुर्वन् तदनुवर्त्तयति स जगदुपकारको जनो धन्य इति भावः। कर्मानुष्ठातॄणां च सर्वोपजीव्यत्वमाह भगवती श्रुतिः—

"अथोऽयं वा आत्मा सर्वेषां भूतानां लोकः स यज्जुहोति यद्यजते तेन देवानां लोकोऽथ यदनुब्रूते तेन ऋषीणामथ यत् पितृभ्यो निपृणाति यत् प्रजामिच्छते तेन पितॄणामथ यन्मनुष्यान् वासयते यदेभ्योऽशनं ददाति तेन मनुष्याणामथ यत् पशुभ्यस्तृणोदकं विन्दति तेन पशूनां यदस्य गृहेषु श्वापदा वयांस्यापिपीलिकाभ्य उपजीवन्ति तेन तेषां लोक इति"। [बृः आः उः १।४।१६] लोको भोग्य उपजीव्यमित्यर्थः ॥ ३० ॥

भगवदुक्तत्वेनोक्तानामर्थानां प्रामाणिकत्वम् उद्घोषयन्नाह इत्येवमिति। अव्ययं नित्यमनादिपरम्परया प्रचलितमेतज्जगच्चक्रं भगवता गीतायां यज्ञकारणकत्वेनोक्तमतो तदन्ततो गत्वा अग्नीषोमात्मके=तद्घटितस्वरूपे यज्ञ एव पुण्यकर्मणि धर्म एव नित्यं प्रतिष्ठितम्। एतदेव

अथवा फलदातृत्वाद् वृषो यज्ञ उदाहृतः ।
वर्षणाद् वृषरूपत्वं धर्मस्यातः प्रकल्पितम् ॥३२॥
यज्ञसम्पादकः कर्त्ता हयमूर्त्तिः प्रकल्प्यते ।
उषाश्रुतौ तु विश्वस्यैवाश्वाभेदो निरूपितः ॥३३॥

मुद्रागता वृषाश्वचक्राकृतयः प्रतिपाद्य भारतवासिनो जनान् तादृशे कर्मणि प्रवर्त्तयन्तीति ध्येयम् ॥ ३१ ॥

अन्यथाऽपि समग्रजगदात्मत्वं मुद्रास्थचक्रस्य प्रतिपादयति अथवेति । फलदातृत्वादिति । वर्षणाद् वृष इति व्युत्पत्त्याऽभिमतफलवर्षणाद्धेतो-र्वृषरूपेण यज्ञात्मको धर्मएव लक्ष्यते ; "त्रिधा बद्धो वृषभो रोरवीति" [ऋक् सं ४।५।४८] इति श्रुतौ यज्ञस्य वृषरूपत्वश्रवणात् ; "यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्"।

[ऋक् सं १०।८।६१।६]

इति तस्यैव यज्ञस्य धर्मत्व-प्रतिपादनात् । नाना शास्त्रेषु च धर्मस्य वृषरूपत्वकथनात् युक्तमेतद् । तथा च महाभारते —

"वृषो हि भगवान् धर्मः ख्यातो लोकेषु भारत ।
निर्घण्टुकपदाख्याने विद्धि मां वृषमुत्तमम् ॥" इति

श्रीमद्भागवतेऽपि :—

"धर्मो हि वृषरूपधृग्" इति । [भाः १।१७।२१]

"वेदः प्रणव एवाग्रे धर्मोऽयं वृषरूपधृक् ।"

[भाः ११।१३।११] इति च ॥ ३२ ॥

वृषेण यदि यज्ञात्मको धर्मः सूच्यते तर्ह्यश्वेन किं प्रतीयते ? तदाह यज्ञसम्पादक इति । यज्ञसम्पादकः = यज्ञसाधनभूतं चराचरं जगत् तथा कर्त्ता यज्ञफलभोक्ता जीवोऽपीत्यर्थः । अश्वमूर्त्तिरिति । महाभारतीय पौष्यपर्वणि ऐरावतशब्दलक्षितस्य धर्मस्य वृषरूपत्वम् अग्निशब्दो-पस्थापितस्य जीवात्मनश्चाश्वरूपत्वं कल्पितं श्रूयते यथा :—

त्यागात्मा वृषभो ज्ञेयो भोगात्माश्वः प्रतीयताम् ।
"तेन त्यक्तेन भुञ्जीथा" इत्येवं श्रुति-चोदना ॥३४॥

"योऽश्वः सोऽग्निः । य ऋषभस्त्वया पथि गच्छता दृष्टः स ऐरावतो नागराट् ।" इति । व्याख्यातं चैतन्नीलकण्ठचतुर्द्धुरिचरणैः—"योऽश्वः सोऽग्निर्भोक्ता जीव इत्यर्थः । इरा=अन्नं तद्वान्=इरावान् क्रतुस्तत उत्पन्न ऐरावतः धर्मो नागराडिवाप्रकम्प्यः ।" इति । चराचरजगतश्चाश्व-रूपत्वकल्पनमुषाश्रुत्युक्तं स्मारयति उषेति । उषा श्रुतिश्च "उषावा अश्वस्य मेध्यस्य शिरः सूर्यश्चक्षुर्वातः प्राणो व्यात्तमग्निर्वैश्वानरः सम्वत्सर आत्मा अश्वस्य मेध्यस्य ।" इत्याद्युक्ता । [बृः आः उः १।१।१] एवमश्वमेधेऽश्वस्य यज्ञसम्पादनहेतुतादर्शनादुषाश्रुतौच विश्वस्यैव जगतोऽश्वावयवैरभेदप्रति-पादनाद् युक्तमश्वेन यज्ञसाधनस्य चराचरस्य जगतः प्रतीतिरिति । चक्रेण तु यज्ञजगतोः कार्यकारणभावेनावर्त्तनं व्यज्यतइति ध्येयम् ॥ ३३ ॥

"तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यचिद्धनम्" । इति [ईशोपनिषत्] श्रौतोपदेशोऽप्यनेन व्यज्यत इत्याह त्यागात्मेति । वृषुसेचने इति त्यागार्थकाद् वृषिधातोर्निष्पन्नत्वेन वृषशब्दः त्याग-प्रवृत्तिनिमित्तेन पुंगवि प्रवर्त्तमानः तत् प्रवृत्तिनिमित्तं त्यागं लक्षयितुं शक्नोति यथा तथैव वृषाकृत्या तत्कार्यस्य त्यागस्यापि प्रतीतिः (बुद्ध्यारोहः) सम्भवतीति भावः । भोगात्माश्व इति । "अश्नाति महाशनो भवति" ; तथा "अश्नुवते अध्वानं महाशना भवन्तीति" ; चेति दुर्गाचार्यव्याख्यान-दर्शनाद्-भोजनार्थकाशूधातोर्निष्पन्नोऽश्वशब्दः भोक्तरि प्रवर्त्तमानः तत्प्रवृत्तिनिमित्तं भोगमपि लक्षयितुं शक्नोति ; तथैवाश्वाकृत्या तत्कार्यस्य भोगस्यापि प्रतीतिःसम्भवतीति भोग-प्रत्यायकत्वमश्वस्य घटतं इति भावः । एवं च त्यागसहकृतेन भोगेन पूर्वोक्तलक्षणं जगच्चक्रमनुवर्त्तेरन्नित्युपदेशोऽपि मुद्रया तद्विदां बुद्धावारोहतीति युक्तम् ॥ ३४ ॥

कारण-प्रतिभूरश्वो वृषः कार्योपलक्षकः ।
ताभ्यां प्रवर्त्तितं चक्रं संसाराख्यं विदुर्बुधाः ॥३५॥
अग्निरूपस्तथाश्वःस्त्री सोमो वृषात्मकः पुमान् ।
तयोर्योगात्मकाद् यज्ञात् प्रजासर्गः प्रवर्त्तते ॥३६॥

सर्वएव कार्योत्पादानुकूलो व्यापारो यज्ञरूप इति सर्वमेव यज्ञबुद्ध्या क्रियमाणं कर्मेश्वरार्पणबुद्ध्या कृतं भवति "यज्ञो वै विष्णुरि"त्यादि श्रुतेः। तादृशं च कर्म वन्धनात्मकं न भवति।

"यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मवन्धनः ।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥" [गीः ३।६]

इति भगवदुक्तेरित्याशयवान् लौकिककर्मणामपि यज्ञात्मकत्वं प्रतिपादयन्नाह कारणप्रतिभूरश्व इत्यादि। तेन वृषाश्वाभ्यां समन्वितेन चक्रेण कार्यकारणसमन्वितं संसारकृत्यं यज्ञत्वेनेश्वरप्रीत्युद्देशेन सम्पादनीयमित्युपदेशो व्यज्यते। एकेनैव चक्रेण यज्ञस्य, कार्यकारणभावस्य, तद्घटितस्वरूपस्य संसारधर्मस्य चोपस्थापनादितिभावः ॥ ३५ ॥

प्रजोत्पादनरूपः प्राणिधर्मोऽपि यथाविधिक्रियमाणो यज्ञ एव, सोऽपि तथात्वेनैवाचरणीय इत्यपि चक्रेणोपदिश्यत इति दर्शयन्नाह अग्निरूप इति। अग्निः प्रजननशक्त्यात्मकः अश्वेन लक्ष्यत इत्युक्तम्। प्रजननशक्तिमत्त्वसाम्यात् स्त्रियोऽप्यग्निरूपा इति ता अपि तेन प्रत्येतव्या भवन्ति। एवं च रेतःसेचनकर्तृत्वसाम्यात् वृषेण सोम इव सोमसधर्मः पुरुषोऽपि प्रत्येतव्यः। अग्नीषोमयोश्च प्रजनन-वीर्याधानशक्तिमत्त्वं श्रूयते यथा :—"सोमो वै रेतोधा अग्निः प्रजानां जनयिता सोमएवास्मै रेतो दधात्यग्निः प्रजां जनयति" इति [तैः सं २।१।२]। स्त्रीपुंसोरग्नीषोमत्वेन तत्सम्बन्धस्य यज्ञत्वात् तयोर्मिथुनीभावरूपाद् यज्ञात् प्रजासृष्टिर्भवतीति व्यक्तम् ॥ ३६ ॥

पञ्चाग्निविद्यया चैतद् यज्ञत्वेनोपवर्णितम् ।
प्रजोद्‌पादक्रियां चैवं यज्ञं यज्ञविदो विदुः ॥३७॥
युद्धयज्ञस्य सेनाग्निरश्वेन प्रतिपाद्यते ।
हवींषि रुधिरादीनि व्यज्यन्ते वृषभेण तु ॥३८॥

स्त्रियां वीर्याधानस्य यज्ञत्वं पञ्चाग्निविद्यायामप्यवगमम्यत इत्याह पञ्चाग्नीति । तथाच श्रुतिः—

"योषावाव गौतमाग्निस्तस्या उपस्थ एव समिद् यदुपमन्त्रयते सधूमो योनिरर्चिर्यदन्तः करोति तेऽङ्गारा अभिनन्दा विस्फुलिङ्गाः ॥ तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुतेर्गर्भः सम्भवतीति" ॥

[छाः उः ५।८।१] ।

सृष्टेश्च चक्ररूपत्वं प्रागुक्तं पश्चात् सुस्पष्टं भविष्यति । एवंप्रकारेण प्रजननक्रियां=प्राणिनां प्रजोत्पादनमपि यज्ञविदः=यज्ञबुद्ध्या भगवत्प्रीत्युद्देशेन कर्माचरणशीलाः निष्काम-कर्मयोगिनः यज्ञं=यज्ञरूपं विदुः ॥ ३७ ॥

राष्ट्ररक्षार्थं शत्रुवधात्मनो विग्रहस्यापि यज्ञबुद्ध्याऽनुष्ठेयत्वं वृषाश्वाभ्यां व्यज्यत इति प्रतिपादयन्नाह युद्धयज्ञस्येति ।

युद्धस्य यज्ञरूपता महाभारतादिषु सविस्तारं वर्णिता । [शाः पः, अः ६८] । अतोऽश्वेन यज्ञाग्निसामान्यात् युद्धस्वरूपघटकः सेनात्मकोग्निरुपस्थाप्यते । वृषेण च हविःसामान्यान्मांसरुधिराद्यात्मकानि युद्धहवींष्यपि प्रतिपाद्यन्ते । तथाच राजधर्मे :—

"कुञ्जराणां हयानां च वर्मिणां च समुच्चयः ।
अग्निः श्येनचितो नाम स च यज्ञे विधीयते ॥" इति ।

[मः भाः, शाः पः ६८।२४]

सन्धिविग्रहयानानि आसनं द्वैधमाश्रयः ।
षड्गुणा राष्ट्ररक्षार्थं ज्ञातव्याः सहचारतः ।।३९।।
तथा योगात्मको सोमो वृषमूर्त्या प्रतीयते ।
वियोगहेतुरग्निस्तु हयरूपेण सूच्यते ।।४०।।

"हवींषि परमांसानि रुधिरं त्वाज्यमुच्यते ।" इति च ।

[मः भाः, शाः पः ६८।१५]॥ ३८॥

तेन किं स्यादित्याह सन्धिविग्रहयानानीति । मित्रीकरणं सन्धिः । परमण्डले दाहलुण्ठनच्छेदादि विग्रहः । शत्रोरवस्कन्दनाय यात्रा यानम् । विजिगीषोर्दुर्गादीन् बर्द्धयतः कालप्रतीक्षयाऽवस्थानमासनम् । बलिनोर्वैरिणोर्मध्ये यथायोगं सामादिभिरुपायेन काकाक्षिवदुभयत्र सन्धिविग्रहादीनां द्वयोः प्रयोगो द्वैधम् । शत्रुपीडितस्य प्रबलतराश्रयणमाश्रयः । एते षड्गुणा दण्डनीतिशास्त्रप्रसिद्धाः राष्ट्ररक्षार्थं प्रयोज्याः । युद्धसाहचर्याद् युद्धेनैवोपलक्ष्यमाणा वृषाश्वाभ्यामेव ज्ञातव्या इति भावः । यज्ञबुद्धया यथाविध्यनुष्ठितस्य च युद्धस्य फलं स्वर्गो राजत्वं वाऽवश्यम्भावीति महाभारतादिषु विस्तरेण वर्णितम् । भगवद्गीतास्वपि भगवता "हतो वा प्राप्स्यसे स्वर्गं जित्वा वा भोक्ष्यसे महीम् ।" इति समासेन प्रतिपादितम् ॥ ३९ ॥

वृषाश्वप्रतिपादिताभ्यां संयोगविभागाभ्यां च चक्रप्रतिपादिता जगतप्रवृत्तिः कालकृता मुद्रया व्यज्यत इत्याह तथेति । संयोगः= संश्लेषः "पयो वै सोम" इति श्रुतेः [तैः सं २।५।५] सोमस्य पयोरूपत्वेन संश्लेषहेतुत्वावगमात् ; स च वृषरूपेण प्रतीयते । वियोगो विश्लेषः, अग्नेस्तद्धेतुत्वेनाश्वाकृत्या स प्रतीयते ; "सोमः प्राजनयदग्निरग्रसत" इति श्रुत्या [तैः सं ३।४।३] सोमाग्न्योरुत्पत्तिध्वंसहेतुत्वावगमादवयवसंश्लेषविश्लेषयोश्च तद्धेतुताया अन्वयव्यतिरेकसिद्धत्वात् ।

एवं वियोगयोगाभ्यां पदार्थानां परस्परम् ।
कार्याणि सृजते कालश्चक्रेणैतत् प्रतीयते ॥४१॥
वृषः स्यात् प्रकृतिः सोमः पुमानग्निर्हयाकृतिः ।
ताभ्यां प्रवर्त्तिता सृष्टिश्चक्रेण परिलक्ष्यते ॥४२॥
दानात्मा वृषभः सोमो हयोऽग्निर्ग्रहणात्मकः ।
दानादानाभ्यां संयुक्तो व्यवहारः प्रवर्त्तते ॥४३॥

सयोगविभागद्वारेण च क्रियातः कार्यं जायते नश्यति इति च प्रत्यक्ष-सिद्धम् । स्पष्टार्थमन्यत् ॥ ४०-४१ ॥

अथवा वृषो भोग्यत्वेन सोमात्मिकां प्रकृतिं प्रत्याययति ; अश्वश्च भोक्तृत्वेनाग्निरूपं पुरुषं बोधयति :—

"अग्नीषोमाविदंसर्वमिति यश्चानुपश्यति ।
न च संस्पृश्यते भावैर्यद्भूतैर्मुक्त एव सः ॥"

इति महाभारतोक्तेः [शाः पः २८८।३३] ;

"पुरुषःप्रकृतिश्चोभौ जगत्सर्वं प्रकीर्त्तितम् ।
अग्नीषोमात्मकं सर्वं तथा तस्य प्रकीर्त्तितम् ॥"

इति विष्णुधर्मोत्तरोक्तेश्च । [विः धः पुः ३।१२६।१] । ताभ्यां=प्रकृति-पुरुषाभ्यां प्रवर्त्तितं संसारचक्रं चक्रचित्रेण प्रतीयत इति भावः ॥ ४२ ॥

अन्यथा त्वश्ववृषाभ्यामन्वितं चक्रं दानग्रहणाभ्यां घटितस्वरूपं क्रियामात्रं बोधयतीत्याशयेनाह दानात्मेति । वृषभस्य त्यागबोधकत्वं प्रागेवोक्तम् । अश्वस्याग्नेर्हविर्ग्रहणदर्शनात् "अग्निरग्रसत"—इति श्रुतेश्च [तैः सं ३।४।३] स्वकार्य-ग्रहणबोधकत्वं संगच्छते । ताभ्यां संघटितस्वरूपं क्रियाजातं चक्रवदावर्त्तमानमास्तइति सर्वथा कर्मानुष्ठेयं भवतीत्युपदेशो मुद्रास्थचक्रसङ्केतित इति हृदयम् ॥ ४३ ॥

आदित्यो लक्ष्यतेऽश्वेन सोमस्तु वृषसूचितः ।
ताभ्यां मार्गद्वयं विद्यादर्चिधूमादिभेदतः ॥४४॥
विद्ययाऽविद्यया गम्यं श्रुतावुक्तं यथाक्रमम् ।
चक्रेण पुनरावृत्तेरभावो भाव एव च ॥४५॥
आम्नायोक्तं कालचक्रं यत् सूर्यमण्डलान्वितम् ।
सम्वत्सरात्मकं चैतत् प्रजापत्यात्मकं तथा ॥४६॥

अथवा, अश्वलाञ्छनत्वादश्वेनादित्यो लक्ष्यते वृषेण च सोमः । ताभ्यामश्ववृषाभ्यां यथाक्रममर्चिरादिमार्ग=आदित्यमण्डलोपलक्षितो, धूमादिमार्गश्च चन्द्रमण्डलोपलक्षितो बुद्धावारोहतीत्याह आदित्य इति ॥ ४४ ॥

किम्भूतं तन्मार्गद्वयमित्याह विद्ययेति । यथाक्रममिति । विद्यया गम्य अर्चिरादिमार्गः, अविद्यया च धूमादिरित्यर्थः । एतत्पक्षे चक्रेण सूचितमर्थमाह पुनरावृत्तेरिति । पुनरावृत्तेरभावः=क्रममुक्तिः ; तस्या भावः=पुनःसंसारावर्त्तनम् एतद्द्वयं चक्रेण सूच्यत इतिशेषः । तथाच श्रुतिः—"तद् य इत्थं विदुः, ये चेमेऽरण्य श्रद्धातप इत्युपासते, तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्यमाण पक्षमापूर्यमाणपक्षाद् यान् षडुदङ्ङेति मासांस्तान्" ॥ इत्यादि [छाः उः, ५।१०।३५६।१] ; "अथ य ग्राम इष्टापूर्त्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति धूमाद्रात्रिं रात्रेरपरपक्षमपरपक्षाद् यान् षड्दक्षिणैतिमासांस्तान् नैते सम्वत्सरमभिप्राप्नुवन्ति" ॥ इत्यादि च [छाः उः ५।१०।३६१।३] ॥ ४५ ॥

चक्रेणावयवशः सूचितमर्थं व्याचक्षाण इदानीं चक्रप्रतिपाद्यं समुदितमर्थं प्रतिपादयति आम्नायोक्तमित्यादिना । आम्नायो=वेदः, तत्रोक्तमेकं कालचक्रमास्ते, यदेकमेव सूर्यमण्डलावच्छिन्नसम्वत्सररूपतया, तथा प्रजापत्यात्मतया चोक्तमित्यर्थः । तथा च श्रुतिः—

"चतुर्भिः साकं नवतिं च नामभिः
चक्रं न वृत्तं व्यँतीरवीविपत् ।
बृहच्छरीरो विमिमान ऋक्कभि-
र्युवा कुमारः प्रत्येत्याहवत् ॥"

[ऋक् सं १।२१।१५६]

अत्र सायनाचार्यचरणाः—"अयमादित्यात्मा विष्णुः चतुर्भिः साकं सहितां नवतिं च चतुर्नवतिमित्यर्थः ; एतत् संख्याकान् कालावयवान् नामभिः स्वकीयनमनप्रकारैः प्रेरणविशेषैर्वृत्तं यथा भवति तथा व्यतीन् विविधायतन-स्वभावान्, वृत्तं चक्रं न बह्वरोपेतं चक्रमिव तं यथा शत्रोरुपरि प्रक्षेपेण भ्रमयति तद्वदुक्तसंख्याकान् कालावयवान् अवीविपत् कम्पयति भ्रमयति । टु वेपु कम्पने ण्यन्ताल्लुङि चङि रूपम् । के पुनस्ते ? उच्यते—सम्वत्सर एकः, अयने द्वे, पञ्चर्त्तवः, द्वादश मासाः, चतुर्विंश-त्यर्द्धमासाः, त्रिंशदहोरात्राः, अष्टौ यामाः, एकस्मिन् पर्यावर्त्तमानानि मेषादीनि द्वादशलग्नानि, इति चतुरधिकनवतिसंख्याकान् अवीविपत् । * * एवं कालात्मको विष्णुर्बृहच्छरीरो विराडात्मना सर्वदेवमनुष्यादि-शरीराणां स्वशरीरत्वात् ; बृहच्छरीरत्वमेवोपपादयति ; विमिमानः विविधमात्मानं मिमानः देवतिर्यगाद्यात्मना विभज्य स्थापयन् । यद्वा ऋक्कभिः स्तुतिमद्भिर्मन्त्रवद्भिर्वा विमिमानः ; यद्यपि विभुस्तथापि भक्त्यधीनत्वात् स्तुत्या मीयते ; युवा सर्वत्र मिश्रणशीलो नित्यतरुणो वा, अतएव कुमारोऽनल्पः, एवम्भूतो महाविष्णुराहवमाह्वानं प्रत्येति गच्छति यज्ञप्रदेशम्" इति । अत्र कालस्य चक्रोपमत्वं महाविष्णोश्च तद्भ्रामकत्वं विस्पष्टमुक्तम् । अपिच :—

"सप्त युञ्जन्ति रथमेक चक्र-
मेकोऽश्वो वहति सप्तनामा ।
त्रिनाभिचक्रमजरमनर्वं
यत्रेमा विश्वा भुवनाधितस्थुः ॥" [ऋक् सं १।२२।१६४]

अत्रापि सूर्यमण्डलान्वितं सम्वत्सरात्मकं कालचक्रमुक्तम्।

"द्वादशारं न हि तज्जराय
वर्वर्त्ति चक्रं परिद्यामृतस्य"। इति

[ऋक् सं १।२२।१६४]

अत्र चक्रस्य द्वादशारत्वमुक्तम्।

"पञ्चारे चक्रे परिवर्त्तमाने
तस्मिन्नातस्थुर्भुवनानि विश्वा।"

[ऋक् सं १।२२।१६४]

अत्रास्य पञ्चारत्वमभिहितम्।

"सनेमिचक्रमजरं विवावृत
उत्तानायां दश युक्ता वहन्ति।
सूर्यस्य चक्षू रजसैत्यावृतं
तस्मिन्नार्पिता भुवनानि विश्वा॥" इति। [तथा]

अत्रारसंख्या नोक्ता।

"द्वादश प्रधयश्चक्रमेकं
त्रीणि नभ्यानि उ तच्चिकेत।
तस्मिनु साकं त्रिशता न शङ्कवोऽ
र्पिताः षष्ठिर्न चलाचला सः॥ [तथा]

अत्र षष्ठ्यधिकत्रिशतान्यरा उक्ताः। एवमनियतरूपत्वमस्य-चक्रस्य कीर्त्तयन्त्या श्रुत्या चक्ररूपत्व एवास्था प्रदर्शिता अरादि संख्यायास्त्व-नियतत्वं सूचितमिति ध्येयम्। तेन प्रकृतचक्रस्य चतुर्विंशतिसंख्य-कारत्वं न श्रुतिविरुद्धमिति मन्तव्यम्। श्रौतश्चायमर्थो महाभारतेऽपि वर्णितः—

"आवर्त्तमानमजरं विवर्त्तनं
षन्नाभिकं द्वादशारं सुपर्वं।

यस्येदमास्योपरि याति विश्वं
तत्कालचक्रं निहितं गुहायाम् ।।"

[मः भाः, शाः पः २४६।३२]

"एकां नाभिं सप्तशता अराः श्रिताः
प्रधिष्वन्या विंशतिरर्पितारा: ।
अनेमि चक्रं परिवर्त्ततेऽजरं
मायाश्विनौ समनक्ति चर्षणी ।।"

[तथा आदि पः ३।६२]

तथा :—

एकं चक्रं वर्त्तते द्वादशारम्
षन्नाभिमेकाक्षममृतस्य धारणम् ।
यस्मिन् देवा अधिविश्वे विषक्ता
स्तावश्विनौ मुञ्चतं मा विषीदतम् ।।

[तथा आदि पः ३।६२]

"त्रीण्यपि तान्यत्र शतानि मध्ये
षष्टिश्च नित्यं चरति ध्रुवेऽस्मिन् ।
चक्रे चतुर्विंशति पर्वयोगे
षड् वै कुमाराः परिवर्त्तयन्ति ।।"

[तथा आदि पः ३।१४६]

श्रीमद्भागवतेऽपि :—

"यस्यैकं चक्रं द्वादशारं षन्नेमि त्रिनाभि सम्वत्सरात्मकं समामनन्ति" । इति [भाः ५।२१।१३]। अराणामनास्थयाऽनियत-संख्यावचनात् सम्वत्सरगतानामर्द्धमासानां, चतुर्विंशति-तत्त्वानां, भूत-प्राणेन्द्रियतन्मात्रान्तःकरणानां वारत्वाभ्युपगमपक्षे चतुर्विंशत्यरस्य मुद्रागतचक्रस्य तत्प्रतिमत्वं सङ्गच्छते ।। ४६ ।।

सर्वत्र कालरूपेण योऽन्तर्बहिरवस्थितः ।
नियामयति सर्वाणि कर्मणां फलदस्तु सः ॥४७॥
कलनात् सर्वभूतानां क्रमणाज्जगतां च तत् ।
यजनाद्-यज्ञरूपेण कालचक्रेति कीर्त्यते ॥४८॥

पूर्वोपन्यस्तवाक्ये "ऋतस्य धारणमिति" चक्रस्य कर्मफलधारकत्व-प्रतिपादनात् तदवच्छिन्नस्य महाविष्णोः क्रियानुसारेणैकस्यैव कालत्वं, चक्रत्वं च निर्वक्ति सर्वत्रेतिद्वयेन । अयमर्थः—यः सर्वान्तर्यामी पुरुषः सर्वत्र पदार्थेषु कालरूपेणान्तर्बहिश्चावस्थितः सन् सर्वाणि नियामयति "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिव्यामन्तरो यमयति" । [बृः उः ३।२] इत्यादि श्रुतेः ।

"विश्वं वै ब्रह्मतन्मात्रे संस्थितं विष्णुमायया ।
ईश्वरेण परिच्छिन्नं कालेनाव्यक्तमूर्त्तिना ॥"

[भाः ३।१०।१२]

"योऽन्तःपुरुषरूपेण कालरूपेण यो बहिः ।
समन्वेत्येष सत्त्वानां भगवानात्ममायया" ॥ [भाः ३।२६।१७]

इति स्मृतेश्च । सएव कर्मणां फलदाता—

"स वा एष महानज आत्माऽन्नादो वसुदान" इत्यादि श्रुतेः [बृः उः ४।४।२४];

"अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां सततयुक्तानां योगक्षेमं वहाम्यहम् ॥" [गीः ९।२२]

इत्यादि स्मृतेश्च ॥ ४७ ॥

सर्वभूतानां कलनात् संहाराद्धेतोः स अन्तर्यामी परमात्मा काल-शब्देन व्यपदिश्यते "कलनात् सर्वभूतानां स कालः परिकीर्त्तितः । इति विष्णुधर्मोत्तरात् ।

संसाराख्यं महत् कार्यं कुर्वद् यत् परिवर्त्तते ।

ज्ञानिनां मुक्तये तत् स्यादज्ञानामतिभीषणम् ॥४६॥

नियमान्नियतिस्तत्स्याच्छक्तत्वाच्छक्तिरेव च ।

भीषणाद् भैरवः सङ्कर्षणश्चाकर्षणात् स्मृतः ॥५०॥

न ते जरा च भ्रमिमायुरेषां
त्रयोदशारं त्रिशतं षष्ठिपर्वा ।
षन्नेम्यनन्तच्छदि यत् त्रिनाभि
करालस्रोतो जगदाच्छिद्य धावत् ॥ [भाः ३ २१।२७]

"योऽन्तःप्रविश्य भूतानि भूतैरत्त्यखिलाश्रयः ।
स विष्ण्वाख्योऽधियज्ञोऽसौ कालः कलयतां प्रभुः" ॥
[भाः ३।२६।३३]

इति भागवतोक्तेश्च ।

जगतां क्रमणात्=अभिव्याप्यावस्थानात् हेतोः चक्रमित्युच्यते :— "ततो विश्वं व्यक्रामत् साशनानशने अभि"—इति, "इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्" । इत्यादि श्रुतेः [यजुः सं ५।१५] । यजनाद्=यज्ञेन तस्यैवाराधनाद्धेतोः स एव यज्ञरूपेणावस्थित इति शेषः ;—"यज्ञोवै विष्णुरि"तिश्रुतेः । अतः स एव कालचक्रमित्यप्युच्यते । तस्यैव कालचक्रस्य प्रतिमैतन्मुद्राङ्कितं चक्रमिति भावः ॥ ४८ ॥

अस्य कालचक्रस्य कार्यप्रतिपादनेन महिमानमाह संसाराख्यमिति । एतदेव कालचक्रं यज्ञरूपेण संसाराख्यं=जगद्रूपं महत् कार्य्यं कुर्वत् नित्यमावर्त्तते । यथार्थरूपेण ज्ञातं सद् ज्ञानिनां मुक्तये=मोक्षदं भवति । कालरूपेण संहारकर्त्तृत्वादज्ञानामज्ञानिनां कृतेऽतिभीषणं प्रतीयते ।, ४६॥

एतदेकमेव सत् क्रियाभेदं निमित्तीकृत्य नियतिः, शक्तिः, भैरवः, सङ्कर्षणः, रुद्रः, ब्रह्मा, विष्णुश्चाभिधीयत इत्याह नियमादित्यादिद्वयेन ।

रुद्रो रोदनहेतुत्वाद् बृहत्त्वाद् ब्रह्म कीर्त्यते ।
व्यापनात् सर्वसत्त्वानां विष्णुरित्यभिधीयते ॥५१॥
सोमाग्निविधृतं चक्रं तद्यज्ञेश्वरनाभिकम् ।
सहर्त्विग्यजमानारं त्रयीनेमियुतं महत् ॥५२॥

"अमा षोडशभागेन देवी प्रोक्ता महाकला ।
संस्थिता परमा माया देहिनां देहधारिणी" ॥ इति

हेमाद्र्याद्यधृतस्कन्दपुराणात् । परमा माया = मूलप्रकृतिरूपा ; देहिनां देहधारिणी = आधारशक्तिरूपेत्यर्थः । भीषणादिति ।

"अनादिनिधनः कालो रुद्रः सङ्कर्षणः स्मृतः" ।

इति विष्णुधर्मोत्तरात्,

"कालोऽस्मि लोकक्षयकृत् प्रवृद्धो
लोकान् समाहर्त्तुमिह प्रवृत्तः" ।

इति भगवद्गीतोक्तेः ;

"कालस्वरूपं रूपं तद् विष्णोर्मैत्रेय वर्त्तते" ।

इति विष्णुपुराणाच्चेति भावः ॥ ५०—५१ ॥

तत्र प्रथमं चक्रस्य यज्ञरूपत्वं वर्णयति सोमाग्नीति । वृषः सोमरूपः, अश्वोऽग्निरूपः । ताभ्यां = सोमाग्निभ्यां विधृतं निष्पन्नस्वरूपं यद् यज्ञरूपं चक्रं तद् यज्ञेश्वरनाभिकं = यज्ञेश्वरो = यज्ञपुरुष एव नाभिः = मध्यकेन्द्रं यस्य तत् तथा । सहर्त्विगयजमानारं = ऋत्विग्भिः सह यजमान एव अरा यस्य तत्तथा ।

"सप्तदशावराश्चतुर्विंशतिपरमाः सत्रमासीरन्नि"ति श्रुतौ [मीः शावरभाष्ये ६।२।१] सत्र ऋत्विजां चतुर्विंशतिसंख्यावगतेश्चतुर्विंशत्यारत्वं चक्रस्य संगच्छते । तत्र यजमानस्य निरुक्तचतुर्विंशत्यनतिरेकात । प्रजातन्त्रे सर्वेषां राष्ट्रवासिनां स्वामित्वाभ्युपगमात् तत्सूचनाय

चतुर्विंशतिवर्णारं त्रिपाद-व्याहृति-प्रधि ।
ॐकारनाभिकं चक्रं गायत्र्याख्यं महाफलम् ।।५३।।
ज्योतीरूपं शिवं सत्यं तद् विष्णोः परमं पदम् ।
यो ध्यायेन्नियतस्तेन सोऽमृतत्वाय कल्पते ।।५४।।

सत्र निदर्शनमुपस्थापितं, सत्रे यागकर्तृणामृत्विग्-यजमानानां सर्वेषां यागफलभागित्वाभ्युपगमात्। त्रयीति ऋग् यजुःसामानि एव नेमिः= प्रधिः, तेन युतमित्यर्थः। महाफलदातृत्वात्तदेव महत् ॥ ५२ ॥

"सम्वत्सरो वै गायत्री"ति [तैः सं २।४।३] श्रुतं कालचक्रस्य सम्वत्सरात्मनो गायत्र्यभेदमुपपादयति चतुर्विंशतिवर्णारमिति। चतुर्विंशतिवर्णाः गायत्रीमन्त्रघटकाः ते एवारा यस्य तत्तथा। त्रयः पादाः=अष्टाक्षरसमुदायात्मकाः, भूर्भुवः स्वरिति व्याहृतित्रयं वा प्रधिः =नेमिः यस्य तत्। ॐकारनाभिकं=प्रणवएव नाभिरूपेणावस्थितो यत्र तदेतादृक् गायत्र्याख्यं चक्रं=चक्रोपमितं, महाफलं=मोक्षफलसाधनं, ज्योतीरूपं शिवं सत्यं तदेव विष्णोः परमं पदं ; यो जनो नियतः सन् तच्चक्रं ध्यायेद्=जपयज्ञेनोपासीत स तेनैव साधनेन अमृतत्वाय कल्पते= मोक्षलाभाय समर्थो भवति। गायत्र्याश्च चतुर्विंशतितत्त्वाद्यात्मना जगच्चक्ररूपत्वमुक्तं विष्णुधर्मोत्तरे :—

रविमध्ये स्थितः सोमः सोममध्ये हुताशनः ।
तेजोमध्ये स्थितं सत्त्वं सत्त्वमध्ये स्थितोऽच्युतः ॥"
[विः धः १।१६५]

इत्यादि वाक्यैः। महाभारतेऽपि :—

तेषां विंशतिरेकोना महाभूतेषु पञ्चसु ।
चतुर्विंशतिरुद्दिष्टा गायत्री लोकसम्मता" ॥ इति ।
[भीः पः ४।१५]

सवितृनाभिकं चैव पक्षारं मासपर्वकम् ।
अहर्नेमियुतं चक्रं सम्वत्सरात्मकं च तत् ॥५५॥
महाभारत वाक्येन तदुक्तमवधार्यताम् ।
"चतुर्विंशतिपर्व त्वां षन्नाभि द्वादशप्रधि ।
तत् त्रिषष्टिशतारं वै चक्रं पातु सदागति" ॥५६॥
[मः भाः, वनपः १३३।२५]

"सप्त ग्राम्याः पशवः, सप्तारण्याः, पञ्चोद्भिज्जा इत्येकोनविंशति-संख्यानां विकाराणां प्रकृतिभूतेषु पञ्चसु महाभूतेषु प्रक्षेपे सति चतुर्विंशत्यक्षरसाम्यात् प्रकृतिविकृत्यात्मिका गायत्रीयं भवति। तत्र स्वेदजानामुद्भिज्जेऽन्तर्भावः तेऽपि भूमिमुद्भिद्य जायन्ते, स्वेदजास्तु जलमुद्भिद्य जायन्ते इति साम्यात्"। इति नीलकण्ठचतुर्द्धुरिणः ॥

"पुरुषो वा व यज्ञस्तस्य यानि चतुर्विंशतिवर्षाणि तत् प्रातःसवनम्, चतुर्विंशत्यक्षरा गायत्री गायत्रं प्रातःसवनम्"। इति श्रुतेः [छाः उः ३।१६।१] पुरुष-यज्ञ-गायत्रीणामैकरूप्यं चात्र स्मर्त्तव्यम् ॥ ५३-५४ ॥

सम्वत्सरचक्रत्वमस्यावयवश उपपादयति संवितृनामिकं चैवेति। सविता = जगत्प्रसविता आदित्यः, स एव नाभिर्यस्य तत्तथा। पक्षारमिति। सम्वत्सरस्य चतुर्विंशतिपक्षात्मकत्वात् ते चतुर्विंशतिः पक्षाः = अर्द्धमासा एवारा यस्य तत्तथा। द्वादशमासाः पर्वाणि अंशा यस्य तत्। अहान्येव पञ्चषष्ठ्यधिकत्रिशतानि नेमिर्यस्य तत्तादृशम्; यत् सम्वत्सरात्मकं चक्रं तदेवैतदित्यभेदेनोपास्यमिति भावः ॥ ५५ ॥

एतत् कल्पनाया अर्वाचीनत्वशङ्कां निराकुर्वन् महाभारतोक्तमपि चक्रस्य रूपं स्मारयति महाभारतेति। चतुर्विंशतिरर्द्धमासाः पर्वाणि यस्य तत् चतुर्विंशतिपर्व। द्वादशमासाः द्वादशराशयो वा प्रधिर्नेमिर्यस्य तत्तादृशम्। त्रिषष्टिशतारं षष्ठ्यधिकानि त्रीणि शतानि दिनानि अरा

अव्यक्तनाभं व्यक्तारं विकार-परिमण्डलम् ।
क्षेत्रज्ञाधिष्ठितं चक्रं स्निग्धाक्षं वर्त्तते ध्रुवम् ॥५७॥
तद् ध्रुवनाभिकं चान्यचक्रं यज्ज्योतिषां महत् ।
नक्षत्रारं तु तज्ज्ञेयं तत्कक्षाचयनेमिकम् ॥५८॥
अरास्तु प्राणास्तन्मात्र-ज्ञानकर्मेन्द्रियाणि च ।
अन्तःकरणयुक्तानि चतुर्विंशति-संख्यया ॥५९॥

यस्य तत् । चान्द्राभिप्रायेणैतदुक्तम् । एतादृशं सदागति = सदाभ्रमण-शीलं यत्कालचक्रं तत् त्वां पात्वित्यर्थः । अरसंख्याया अनियतत्वस्य महाभारत एवोपलब्धत्वात् तत्रानास्थाप्रतीतेरर्द्धमासानामरत्ववर्णनं मासानां च पर्वत्वकल्पनं न विरोधमावहतीति सुधीभिर्भाव्यम् ॥ ५६ ॥

महाभारतोक्तमेव चक्रस्य सर्वात्मकत्वं जगदात्मकत्वं च स्मारयति अव्यक्तनाभमिति । अव्यक्तं = प्रकृतिः धीवासनावृन्दं वा नाभिवदन्तरङ्गं यस्य तत् । व्यक्तानि = पञ्चज्ञानेन्द्रिय-पञ्चकर्मेन्द्रिय-पञ्चतन्मात्र-पञ्च-भूतानि मनोबुद्धिचित्ताहङ्काराश्चेति चतुर्विंशति अराः = नाभिनेमिसन्धान-काष्ठानि यस्य तत् । विकारो = ज्ञानक्रियादिः परिमण्डलं = नेमिस्तद्-वत् यस्य तत् । स्निग्धं = रञ्जनात्मकं रजः, अक्षइव चालकं यस्य तत् । चक्रं = जन्ममरणप्रवाहसङ्घातः । क्षेत्रज्ञेनाधिष्ठितं ध्रुवमविचाल्यं वर्त्तत इति शेषः ॥ ५७ ॥

भचक्ररूपत्वमस्य वर्णयति तद्ध्रुवनाभिकमिति । ज्योतिर्मण्डलरूपं यद्भचक्रमस्ति तस्य ध्रुव एव नाभिस्थानीयः, नक्षत्राण्येवाराः, नक्षत्र कक्षापथ एव नेमिः । तद्रूपेणाप्येतन्मुद्राङ्कितं चक्रं ज्ञेयमित्यर्थ ॥ ५८ ॥

पुरुषाधिष्ठितं प्राणिदेहमपि चक्रत्वेन निर्वर्णयन् अस्य तद्रूपतामाह अरास्तु प्राणा इति द्वयेन । प्राणाः पञ्च, तन्मात्राणि पञ्च, ज्ञानेन्द्रियाणि

परमात्माभिबद्धानि जीवनेमियुतानि च ।
तच्चक्रं भ्रामयन्नास्ते मायया परमेश्वरः ॥६०॥
कालनेमियुतं चक्रं सच्चिदानन्द-नाभिकम् ।
अन्तःकरण-भूतेन्द्रिप्राणारं ब्रह्म शाश्वतम् ॥६१॥
अद्वैतं द्वैतवदभातं निर्गुणं शान्तमव्ययम् ।
वृषो हि भगवान् धर्मो ब्रह्मविद्याप्रदो हयः ॥६२॥

पञ्च, कर्मेन्द्रियाणि पञ्च, अन्तःकरणानि मनो-बुद्धिचित्ताहङ्काराश्चत्वारि इति मिलित्वा चतुर्विंशतिसंख्यया विशिष्टा अराः। तानि परमात्मरूपे नाभौ बद्धानि। जीवाः कर्मफलभोक्तारः, त एव नेमिरूपं तेन युतानि। एतच्चक्रं स्वीयमायाशक्तिद्वारेण परमेश्वर एव भ्रामयन्नास्ते। तथाच श्रुतिः—"स वा अयमात्मा सर्वेषां भूतानामधिपतिः, सर्वेषां भूतानां राजा, तद् यथा रथनाभौ च रथनेमौ चाराः सर्वे समर्पिताः एवमेवास्मिन्नात्मनि सर्वाणि भूतानि, सर्वे देवाः, सर्वे लोकाः, सर्वे प्राणाः, सर्वएत आत्मानः समर्पिताः।" [बृः उः २।५।१५] इति। स्मृतिश्च भवतिः—

"ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया॥" इति।
[गीः १८।६१] ॥ ५६—६० ॥

अस्य परब्रह्मरूपकत्वं विवृणोति कालनेमीति। कालएव नेमिः= प्रधिस्तेन युतम् "सदेव सौम्येदमग्र आसीदि"त्यादि [छाः उः ३।२।१] श्रुत्या कालस्य सृष्टेः पूर्वं परतश्च सद्भावप्रतीतेः सर्वव्यापकत्वेन नेमित्वं युज्यते। सच्चिदानन्दं ब्रह्म तदेव नाभिस्थानीयं यस्य तत्तथा। अन्तःकरण-भूतेन्द्रियप्राणाः प्रागुक्ताः चतुर्विंशतिः अरा यस्य तत्तथा।

आभ्यां प्रवर्त्तितं चक्रं धर्मज्ञानमयं च तत् ।
भगवन्नाभिकं तत्तु जीवात्मगणनेमिकम् ॥६३॥

शाश्वतं सर्वदैकरूपमविकारीति यावत् । ब्रह्म=बृहत्त्वाद् बृंहणत्वाच्च सर्वान्तर्यामी सर्वव्यापकश्च परमात्मेत्यर्थः । अतएवाद्वैतं=सजातीय-विजातीय-द्वितीयरहितम् । द्वैतवद्भातं=मायया जगत्प्रपञ्चरूपेण प्रतीतम् ; रज्जुर्यथा सर्पवदवभासते तथा ब्रह्मैव प्रपञ्चरूपेण नानेव प्रतिभासते इति वेदान्तविदः । वस्तुतो निर्गुणं=निर्विशेषम् ; शान्तमविकारि, अव्ययमविनाशि यत्तदेव मुद्राङ्कितेन चक्रेण सूचितमित्यर्थः । श्वेताश्वतरश्रुतौ तु चक्रमिदं यदन्यथा वर्णितं यथा :—

"तमेकनेमिं त्रिवृतं षोडशान्तं
शतार्द्धारं विंशति प्रत्यराभिः ।
अष्टकैःषड्भिर्विश्वरूपैकपाशं
त्रिमार्गभेदं द्विनिमित्तैकमोहम् ॥" [श्वेः उः १।४]

तत्र वर्णितानामपि चक्रावयवानामत्रान्तर्भावसम्भवान्नानेन विरोध-मावहतीति ध्येयम् ।

अद्वैतवाद्यभिमतं वृषाश्वाभ्यां सूचितमर्थमाह वृषोहीति । वृषरूपेण धर्म उपस्थापितः ; चित्तशुद्धिद्वारेण तस्य ब्रह्मज्ञानोपयोगित्वात् ; "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेने"त्यादि श्रुतेः [बृः उः ४।४।२२]। हयरूपेण च ब्रह्मविद्याप्रदो गुरुः प्रतीयते ; "अश्वस्य शिर्ष्णा प्रयतानुवाच" इत्यादि [श्रीधरस्वामिधृता, भाः टीः ६।९।५०] श्रुतावश्वशिरसो ब्रह्मविद्याप्रदत्वप्रसिद्धेः ; "तद्विज्ञानार्थं स गुरुमेवाभि-गच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमि"ति [मुः उः १।२।१२] श्रुत्यात्मज्ञानस्य गुर्वभिगमनहेतुकत्वावगमाच्च ॥ ६१—६२ ॥

चक्रं वैष्णवाभिमत-भागवतधर्मचक्रत्वेनोपवर्णयति आभ्यामिति पञ्चकेन । आभ्यां=वृषसूचितेन धर्मेण, हयसूचितेन च विष्णुतत्त्वज्ञाना-

सत्यं दया तपः शौचं तितिक्षेक्षा शमो दमः ।
अहिंसा ब्रह्मचर्यं च त्यागः स्वाध्याय आर्जवम् ॥६४॥
सन्तोषः समदृक्सेवा ग्राम्येहोपरमः शनैः ।
नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनम् ॥६५॥
अन्नाद्यादेः संविभागो भूतेभ्यश्च यथार्हतः ।
तेष्वात्मदेवताबुद्धिः त्रिविधा भगवद्रतिः ॥६६॥

चार्येण, प्रवर्त्तितं यत् धर्मज्ञानमयं चक्रम् । वृषेण सामान्यतः प्रत्यायितो भागवतधर्मः चक्रेणावयवशो विशेषेण प्रत्याय्यत इति न पौनरुक्त्यम् । तत्तु चक्रं भगवन्नाभिकं=भगवान् विष्णुरेव नाभिर्यस्य तत्तादृशम् । जीवात्मगणनेमिकं=भगवद्भक्ता जीवात्मान एव नेमिर्यस्य तत्तथा । सत्यं=यथार्थवचनम् ; दयादयः प्रसिद्धाः ; ईक्षा=युक्तायुक्तविवेचनम् ; शमो=मनःसंयमः ; दमो वाह्यन्द्रियसंयमः ; त्यागो=दानम् ; स्वाध्यायो यथोचितजपः ; आर्जवं=सरलता ; सन्तोषो=दैवलब्धेनालंबुद्धिः ; समदृक्सेवा = समदृशां महतां सेवा, समदृष्ट्या सेवा वा ; ग्राम्येहोपरमः = लौकिककर्मस्वनासक्तिः ; विपर्ययेहा = निष्फलक्रिया, तासामीक्षा=पर्यालोचनम् ; मौनं वृथालापनिवृत्तिः ; आत्मविमर्शनं = देहादिव्यतिरिक्तात्मानुसन्धानम् । अन्नाद्यादेरिति । अन्नमोदनम् ; आद्यं = मोदकादि ; तत्तदादेः' वस्त्रस्रक्चन्दनादिभोग्यस्य यथोचितं भूतेभ्यो भागं दत्वा तदवशिष्टस्यैव ग्रहणमित्यर्थः । तेषु = सर्वभूतेषु आत्मवत् देवतावच्च बुद्धिर्भावना । भगवद्रतिः = भगवद्भक्तिः त्रिविधा त्रैविध्यमाह कायेनेति । कायवाङ्मनोभिः साध्या इत्यर्थः । एवं सम्भूय चतुर्विंशतिसंख्यातैरेतैः सत्यादिभिररैर्युतं = समन्वितं भागवतधर्मात्मकं चक्रमित्यर्थः । भागवतोक्तत्रिंशल्लक्षणवान् धर्म एवात्र चतुर्विंशतिलक्षणवत्त्वेन गृहीतः । तथाच श्रीमद्भागवते :—

कायेन मनसा वाचा साध्या एतैररैर्युतम् ।
चतुर्विंशतिसंख्यातैश्चक्रं भागवतात्मकम् ॥६७॥
वैष्णवा अनुवर्त्तन्ते भक्तियोगपरायणाः ।
एवं शैवात्मकं शैवाः शैवाचारानुवर्त्तिनः ॥६८॥

"सत्यं दया तपः शौचं तितिक्षेक्षा शमो दमः ।
अहिंसा ब्रह्मचर्यं च त्यागः स्वाध्याय आर्जवम् ॥
सन्तोषः समदृक्सेवा ग्राम्येहोपरमः शनैः ।
नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनम् ॥
अन्नाद्यादेः संविभागो भूतेभ्यश्च यथार्हत. ।
तेष्वात्मदेवताबुद्धिः सुतरां नृषु पाण्डव ॥
श्रवणं कीर्त्तनं चास्य स्मरणं महतां गतेः ।
सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पणम् ।
नृणामयं परो धर्मः सर्वेषां समुदाहृतः ।
त्रिंशल्लक्षणवान् राजन् सर्वात्मा येन तुष्यति ॥" इति ।

[भाः ७।११।७-११]

श्रवणादीनां नवानां कायिक-वाचिक-मानसिकरूपेण त्रिष्वेवान्तर्भावा-भ्युपगमादराणां चतुर्विंशतिसंख्यासङ्गतिः ॥ ६३—६७ ॥

एवमुक्तरूपं धर्मचक्रं भक्तियोगपरायणा वैष्णवा अनुवर्त्तन्त इत्याह वैष्णवा इति । शैवादिसम्प्रदायान्तराणामपि स्वस्वाभिमतोऽर्थः मुद्राङ्कितेन वृषाश्वसहितेन चक्रेण व्यज्यत इत्युपपादयति एवमित्यादिना सार्द्धद्वयेन । एवं = निरुक्तप्रकारेण । एतेषां मतेऽपि वृषाश्वाभ्यां तत्तदभिमतो धर्मो, ज्ञानं ज्ञानप्रदो गुरुर्वा ज्ञातव्ये । शैवानामभिमतं धर्मचक्रं च महेश्वरनाभिकं जीवात्मगणनेमिकं महेश्वरप्राप्तिसाधनैः क्रियाविध्यात्मकैः सत्यादिभिश्चारैर्युतं शैवात्मकं = शैवधर्मचक्रत्वेन व्यपदेश्यं शैवाचारानुवर्त्तिनोऽनुवर्त्तन्त इत्यर्थः ॥६८॥

सौराः सौरात्मकं चक्रं शाक्ताः शक्तिमयं तथा ।
गाणपत्यादयश्चैवं तत्तन्मार्गानुसारिणः ॥६९॥
स्वस्वधर्ममयं चक्रं वर्त्तेरन्नविरोधतः ।
स्वं स्वं चरित्रमास्थाय नानाधर्मविदो जनाः ॥७०॥
दुष्टानां दमने हेतुः शिष्टपालनसाधनम् ।
अश्ववृषाङ्कितं विद्याद्धर्मज्ञानप्रवर्त्तितम् ॥७१॥

एवमुपास्यनाभिकमुपासकनेमिकं स्वाभिमतप्राप्तिसाधनैः सत्यादिभिः क्रियाज्ञानात्मकैश्च तत्तदागमभेदाभिमतैररैर्युतं सौरादिशब्दव्यपदेश्यं स्वस्वधर्मात्मकं चक्रं तत्तन्मार्गानुसारिणः अनुवर्त्तन्त इति शेषः। एवं माहम्मद-यिषवीयादि धर्मेष्वप्यूहनीयम् ॥६९॥

एवंरूपेणेदं मुद्राङ्कितं चक्रं सर्वेषामेव सम्प्रदायानां स्वस्वधर्मचक्ररूपेणावस्थितमभिमतं चेति विभिन्नधर्मावलम्बिनोऽपि स्वस्वधर्मानुष्ठानमपरित्यज्य तत्र तत्र बद्धादरा एव परस्पराविरोधेनानुवर्त्तेरन्नित्याह स्वस्वधर्ममयमिति। स्पष्टोऽर्थः ॥७०॥

सर्वेषामेव सम्प्रदायानां मध्ये येन केनचित् प्रकारेण तत्तद्धर्मस्वरूपोपस्थापकतया चक्रमिदमनुप्रविष्टमिति नास्त्यत्र कस्यचिद् विमतिरिति प्रतिपादयन् अस्य विष्णुचक्रात्मतया सर्वात्मकत्वं तत्स्वरूपं चाह दुष्टानामिति सार्द्धद्वयेन। अश्वस्य दुष्टदमनहेतुत्वेन लोके प्रयोगदर्शनात् तेन चक्रगतं दुष्टदमनकार्यं व्यज्यते ; वृषस्य च कृष्यादिसाधनतया पालनहेतुत्वदर्शनात् तेन शिष्टपालनकार्यं व्यज्यते। तथाश्ववृषाभ्यामन्वितं मुद्राङ्कितं चक्रं धर्मज्ञानाभ्यां प्रवर्त्तितं सुदर्शनाख्यं विष्णोश्चक्रं विद्यात्। वृषाश्वयोर्धर्मज्ञानव्यञ्जकत्वस्योक्तत्वात्। किम्भूतं विष्णोश्चक्रमित्याह ज्योतिर्मयं=ज्योतिश्चक्ररूपेण स्थितम्। पुनः किम्भूतं ? महत्=कालचक्रादिरूपत्वात् सर्वात्मकम्। वैकुण्ठः=कुण्ठारहितः अप्रतिहत-

सुदर्शनाख्यं तद् विष्णोश्चक्रं ज्योतिर्मयं महत् ।
प्रवर्त्तयिता भगवान् वैकुण्ठो गरुडध्वजः ॥
यद् ध्यात्वा साधकः साक्षाद् वैष्णवं पदमश्नुते ॥७२॥
चक्राणि चितिमध्यानि देहमध्यगतानि षट् ।
तेषामुपरि यच्चक्रं सर्ववर्णमयं शुभम् ॥६॥

संकल्पो भगवान् गरुडध्वजो विष्णुरस्य चक्रस्य प्रवर्त्तयिता । तथाचोक्तं महाभारते :—

"कालचक्रं जगच्चक्रं युगचक्रं च केशवः ।
आत्मयोगेन भगवान् परिवर्त्तयतेऽनिशम् ॥
कालस्य च हि मृत्योश्च जङ्गमस्थावरस्य च ।
ईशते भगवानेकः सत्यमेतद् ब्रवीमि ते ॥" इति ।

[उः पः ६८।१२—१३]

तथा :—प्रवृत्तमेतद् भगवन् महर्षे
महाद्युतेश्चक्रमनन्तवीर्यम् ।
विष्णोरनन्तस्य सनातनं तत्
स्थानं सर्गा यत्र सर्वे प्रवृत्ताः ॥ इति च ।

[शाः पः २७६।५८]

विष्णुधर्मोत्तरेऽपि :—

"संसारभ्रमणं चक्रं चक्रं विष्णुकरे स्थितम् ।
धर्मचक्रं कालचक्रं भचक्रं च महाभुज ॥" इति ।

[विः धः ३।६०।५]

एतच्चक्रोपासनायाः फलमाह यद्ध्यात्वेति । साक्षादेव वैष्णवपदं=मोक्षमश्नुते=लभत इत्यर्थः ॥७१—७२॥

आगमिकाभिमत-षट्चक्रपरत्वं तथा तदुपरिस्थित-सहस्रारचक्रोपमत्वमस्य दर्शयति चक्राणि चितिमध्यानीति । चितिमध्यानि=

जाग्रत् कुण्डलिनीस्थानं सहस्रारं सुधामयम् ।
शिवेन वृषभाङ्केन शक्त्या च हयरूपया ॥
विधृतं साधको ज्ञात्वा जीवन् मोक्षमवाप्नुयात् ॥७४॥
अग्निरश्वाकृतिर्देवो हविः सोमो वृषाकृतिः ।
चक्रं तु सर्वदेवानां यन्त्राणि मण्डलानि च ॥७५॥
कौलानां भैरवीचक्रं कालचक्रं च तद्विदाम् ।
तौर्यत्रिकान्वितो धर्मः पर्वतोपान्तवासिनाम् ॥७६॥

चैतन्यशक्तिर्मध्ये सञ्चरति येषां तानि ; तेषामुपरि ब्रह्मरन्ध्रे यच्चक्रं तत् । सर्ववर्णमयं = मातृकावर्णघटितस्वरूपम् ; जाग्रत्कुण्डलिनीस्थानं = जाग्रदवस्थया कुण्डलिन्या शक्त्याश्रितं स्थानं, सुधामयममृतस्याकरभूतम् । वृषभाङ्केन = वृषाकृतिसङ्केतितेन शिवेन ; हयरूपया = अश्वाकृतिसङ्केतितया शक्त्या विधृतमेतच्चक्रस्वरूपं ज्ञात्वा साधको जीवन्मुक्तो भवतीति तदागमसिद्धान्तः ॥७३—७४॥

आगमाभिमतं क्रियायोगमनुसृत्यार्थान्तरमप्याह अग्निरिति । आगमवर्त्मनि च क्रियायोगपरा यन्त्रे मण्डले च चक्राकृतौ देवतोद्देश्यकद्रव्यत्यागेनाग्नौ हविःप्रक्षेपेण च साधयन्ति । एवं चाश्वाकृत्या उपास्यो देवोऽग्निर्वा, वृषभाकृत्या च देवतोद्देशेन त्यज्यमानं हविर्द्रव्यं लक्ष्यते ; चक्रेण तत्तद्देवता-यन्त्राणि मण्डलानि च लक्ष्यन्ते इति वेदितव्यम् । अश्ववृषभयोः सोमाग्निरूपहविर्देवतयोर्लक्षकत्वं प्रागुक्तम् । चक्रस्य चाकृतिसाम्यात् यन्त्रमण्डलप्रत्यायकत्वं युज्यते ॥७५॥

कौलमार्गानुसारिणां पक्षे तदभिमतं भैरवीचक्रं = चक्राकारेण सम्पाद्यस्तन्नामा क्रियाविशेषः तदागमप्रसिद्धः प्रतीयते चक्रत्वाविशेषादित्याशयेनाह कौलानामिति । तथा कालचक्रयानानुसारिणां मते तदागमप्रसिद्धं कालचक्रं प्रत्येतव्यं चक्रचिह्नेनेत्याह कालचक्रमिति । वृषाश्वाभ्यां

चक्राकारेण सम्पाद्यः सर्वं चक्रे प्रतिष्ठितम् ।
भारताभिजनैः सर्वैश्चक्रं सम्पूज्यते ततः ॥७७॥
चतुर्विंशारचक्रेण लक्ष्यते सूर्यमण्डलम् ।
तत्क्रियालक्षितं कालमहोरात्रात्मकं च यत् ॥७८॥
इदानीन्तन-लोकेषु सर्वं कर्मप्रवर्त्तकम् ।
अरैर्व्यज्यते तन्तु चतुर्विंशति-भाजितम् ॥७९॥
अथवा तद्गतं चक्रमविवेकप्रधिस्थितम् ।
चतुर्विंशतितत्त्वारं चिन्नाभं जगदात्मकम् ॥८०॥

तु तेषां मतेऽपि शिवशक्ती, भैरवभैरव्यौ, धर्मज्ञाने वा यथायोगं प्रत्येतव्ये इति न विस्मर्त्तव्यम् ॥

भारतवर्षीयजनजातिषु मण्डलाकारेण नृत्येन गीतवाद्यसहकृतेनानुष्ठेयं नानाविधं धर्मकृत्यं प्रसिद्धमस्ति । एवं च वृषचित्रेण संयोग-देयद्रव्य-दानादीनां प्रागुक्तानां प्रतीतिः ; अश्वचित्रेण विभागोपास्यदेव ग्रहणादीनां प्रतीतिस्तेषामप्यभिमता भवितुमर्हति ; तेषां धर्मकृत्येष्वप्येतेषामपरिहार्य-त्वात् । चक्रेण तु मण्डलाकारेण सम्पादनीयं नृत्यकृत्यादिकं प्रतीयेताकार-साम्यात् । तौर्यत्रिकं = नृत्यगीतवाद्यानि । स्पष्टमन्यत् ॥७६—७७॥

अधुना हि सर्वत्र चतुर्विंशतिघण्टाभिः परिमितमहोरात्रं लोके कर्मप्रवृत्तिहेतुर्भवतीति तादृशमहोरात्रमेव सूचयत् चक्रं जनानां कर्मप्रवृत्ति जनयति । तत्र चक्रस्वरूपेण सूर्यमण्डलं तत्क्रियावच्छिन्नमहोरात्रं वा, अरैश्च चतुर्विंशतिघण्टापरिमाणमुपलक्षयतीत्याह चतुर्विंशारचक्रेणेति-द्वयेन । स्पष्टार्थः श्लोकः ॥ ७८—७९ ॥

सांख्ययोगसिद्धान्तव्यञ्जकत्वमस्या मुद्रायाः प्रतिपादयति अथवेति द्वयेन । तद्गतं = मुद्राङ्कितं चक्रमविवेकप्रधिस्थितम् = अविवेक एव-

यद्ध्यात्वा साधकः साक्षात् सांख्ययोगमते स्थितः ।
व्यक्ताव्यक्तज्ञविज्ञानात् सद्यो मोक्षाय कल्पते ॥८१॥
वैशेषिकनये चक्रं द्रव्यनाभं गुणारकम् ।
समवायक-सामान्य-विशेषपरिवेष्टनम् ॥८२॥

प्रधिः = नेमिस्तत्र प्रतिष्ठितम् । प्रकृतिमहदहङ्कारैकादशेन्द्रिय-पञ्चतन्मात्र-पञ्चभूतानीति चतुर्विंशतितत्त्वानि अरा यस्य तत्तादृशम् । चित् = चैतन्यस्वरूपः पुरुष एव नाभिर्यस्य तत्तथा । तद्ध्यानफलमाह यदिति । सांख्यश्च योगश्च तयोर्मते स्थित इत्यर्थः । व्यक्ताव्यक्तज्ञविज्ञानादिति । व्यक्तं = कार्यजातम् ; अव्यक्तं = प्रधानं प्रकृतिरिति यावत् । ज्ञः = पुरुषः । तद्विज्ञानादेतेषां विवेकज्ञानात् । "वृषः स्यात् प्रकृतिः सोमः पुमानग्निर्हयाकृतिरि"ति प्रागुक्तत्वात् वृषाश्वाभ्यामेव प्रकृतिपुरुषविवेको व्यज्यत इति भावः । सद्यः = तत्क्षणादेव ; मोक्षाय कल्पते = कैवल्यं लभते ;

"चतुर्विंशतितत्त्वज्ञो यत्र तत्राश्रमे वसन् ।
जटी मुण्डी गृही वापि मुच्यते नात्र संशयः ॥"

इति तत्सिद्धान्तात् । अथवा वृषेणाविवेकहेतुकं बन्धनं, हयाकृत्या च विवेकहेतुको मोक्षः सङ्केतित इत्येवं सांख्ययोगसिद्धान्तसूचकतास्या मुद्रायाः सङ्गच्छते ॥८०—८१॥

वैशेषिकनयेन तत्सिद्धान्त एव मुद्रया सूचित इति प्रतिपादयन्नाह वैशेषिकनये इति ।

"द्रव्यं गुणस्तथाकर्म सामान्यं सविशेषकम् ।
समवायस्तथाऽभावः पदार्थाः सप्त कीर्त्तिताः ॥"

[भाषापरिच्छेदः १।२]

इति तेषां सिद्धान्तः । ते सप्त पदार्था एवास्य चक्रस्यावयवत्वेन कल्प्यमानास्तत्र द्रव्यं चक्रस्य नाभिरूपं चक्रावयवानां नाभाविव गुणादि-

अभावरन्ध्रकं कर्मभ्रमिकं जगदात्मकम् ।
धर्मेण विधृतं तत्तु ज्ञानसाधनमुत्तमम् ॥८३॥
प्रमातृनाभिकं नयनये यमितिनेमिकम् ।
इतरैर्घटितारं तच्चक्रं तत्त्वमयं महत् ॥८४॥

पदार्थान्तराणां द्रव्ये आश्रितत्वनियमात् । गुणाः = तत्प्रसिद्धाश्चतुर्विंशति-संख्यका अरा यस्य तत्तादृशम् । समवाय-सामान्य-विशेषा इति पदार्थ-त्रयं परिवेष्टनं नेमिरूपं यस्य । अभावो रन्ध्रं = चक्रगतावकाशस्थानीयं यस्य तत्तथा । जगदात्मकं = समग्रपदार्थघटितस्वरूपं चक्रम् । तत्तु धर्मेण = वृषरूपसूचितेन विधृतं = नियन्त्रितम् ; ज्ञानसाधनं = अश्वरूप-सूचितस्य ज्ञानस्य साधनभूतम् । तत्त्वज्ञानाचात्यन्तिकदुःखनिवृत्त्यात्मा मोक्ष इति तेषां समयः ॥८२—८३॥

नैयायिकसिद्धान्तलक्षकत्वमुपपादयति प्रमातृनाभिकमिति द्वयेन । प्रमातारं विनाऽस्या आन्विक्षिकीविद्याया अप्रवृत्तेः स एवास्या मूलमिति प्राधान्यात् प्रमातुर्नाभित्वकल्पनं युक्तम् । प्रमातैव नाभिर्यस्य तत्तादृशम् । प्रमितिर्यथार्थज्ञानं नेमिरूपेणावस्थितं यस्य तत्तथा । प्रमितेरेव फलत्वेन प्रमेयतोऽपि प्राधान्यात् तस्या नेमित्वकल्पनम् । इतरैरिति । प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानैरित्यर्थः, घटिता अरा यत्र तत्तथा । प्रमेयशब्देनात्र वैशेषिकोक्ताः द्रव्यगुणकर्मसामान्य-विशेषसमवायाः षट् पदार्था अपि गृह्यन्ते तत्समानतन्त्रत्वान्न्याय-सिद्धान्तस्य ; "अस्त्यन्यदपि द्रव्यगुणकर्मसामान्य-विशेष-समवायाः प्रमेयमि"ति भगवद् वात्स्यायनोक्तेश्च । [न्यायभाष्ये ।१।१।९]

प्रमाणानि चत्वारि प्रत्यक्षानुमानशब्दोपमानानि, द्रव्यादि षट् प्रमेयाः, संशयादयश्चेतरे चतुर्दश पदार्थाः इति मिलित्वाऽराणां-चतुर्विंशतिसंख्यासङ्गतिः । आत्मशरीरेन्द्रियाणां तु प्रमातर्यन्तर्भावा-

धर्मज्ञाने वृषाश्वाभ्यां वन्धमोक्षावथाऽपि वा ।
प्रतीयेतेऽत्र पक्षेऽपि पूर्ववत्तत्त्ववेदिभिः ॥८५॥
वृषभेण जिनं विद्याद् धर्मश्चाश्वेन सूच्यते ।
लाञ्छनं नमिनाथस्य चक्रमार्हतसम्मतम् ॥८६॥
सम्यक्त्व-ज्ञान-चारित्रनाभं तत्त्वान्तरप्रधि ।
तीर्थङ्करारं तद्धर्मचक्रं कालात्मकं च यत् ॥८७॥

त्तेनैव ग्रहणम् । तच्चक्रं, तत्त्वमयं = पदार्थगणघटितस्वरूपम् ; अतएव महदिति भावः ॥८४॥

अस्मिन् पक्षेऽपि वैशेषिकपक्षइव वृषेण धर्मो वन्धनं वा, अश्वेन तु ज्ञानं मोक्षो वा प्रत्याय्यत इत्याह धर्मज्ञान इति । स्पष्टमन्यत् ॥८५॥

मुद्रोपस्थापितमार्हताभिमतमर्थं प्रतिपादयन्नाह वृषभेणेति । "स्तुवे जिनेन्द्रं वृषमैककेतुम्" [जैनी सप्तपदार्थी] इत्यादौ भगवतो जिनस्य वृषलाञ्छनत्वाभ्युपगमात् तेन भगवान् जिन एव व्यज्यते । धर्मः जैनागमप्रसिद्धः—

"जिनशासनस्य सारो जीवदया निग्रहः कषायाणाम् ।
साधर्मिकवात्सल्यं भक्तिश्च तथा जिनेन्द्राणाम् ॥"

[सुभाषितपद्यरत्नाकरधृत-धर्मविन्दुः]

इत्येवंरूपः । सच "चलन-स्वभावो धर्मः" इति [जैनी सप्तपदार्थी] चलनस्वभावसामान्यादश्वेन लक्ष्यते । चक्रं च नमिनाथस्य = तदाख्यस्यार्हतो लाञ्छनमित्यार्हता अभ्युपगच्छन्ति ॥८६॥

चक्रावयवोपस्थापितं जैनसमयानुगतमर्थमाह सम्यक्त्वेति । सम्यक्त्वं नाम,

"या देवे देवताबुद्धिर्गुरौ च गुरुता मतिः ।
धर्मे च धर्मधीः शुद्धा सम्यक्त्वमिदमुच्यते ॥" [योगशास्त्रम्]

विज्ञाननाभिकं यत्तु शून्यनाभिकमेव वा ।
अविद्यादिभिरेतेषां निरोधैः परिवेष्टितम् ॥८८॥

इत्येवमुक्तं सम्यग्दर्शनम् । ज्ञानम् :—

"विषयप्रतिभासं चात्मपरिणतिमत्तथा ।
योऽवबोधस्तमत्राहुः सम्यग्ज्ञानं मणीषिणः ॥"

[योगशास्त्रम्]

इत्येवमुक्तलक्षणम् । चारित्रम् :—

"सर्वसावद्ययोगानां त्यागश्चारित्रमुच्यते ।
कीर्त्तितं तदहिंसादिव्रतभेदेन पञ्चधा ॥
अथवा पञ्चसमिति-गुप्तित्रयपवित्रितम् ।
चरित्रं सम्यक्चारित्रमित्याहुर्मुनिपुङ्गवाः ॥"

[योगशास्त्रम्]

इत्युक्तलक्षणम् । त्रिरत्नाभिधानस्यैतत्त्रयस्य प्राधान्यादभ्यर्हितत्वाच्च नाभित्वमुक्तम् । तत्त्वान्तराणि="जीवाजीवास्रव-बन्ध-संवर-निर्जर-मोक्षास्तत्त्वानि सप्तैव पदार्थाः ।" [जैनी सप्तपदार्थी] इत्युक्ताः पदार्थाः ; तान्येव प्रधिर्नेमिर्यस्य तत्तथा । तीर्थङ्करारम्=चतुर्विंशतितीर्थङ्कराः जैनधर्मप्रवर्त्तका अर्हन्तएवारा यस्य तत्तादृशम् । तज्जैनागमसिद्धं धर्मचक्रं =धर्मात्मकं चक्रं, तस्य प्रत्यायकमप्येतदित्यर्थः । कालात्मकस्य चक्रस्योत्सर्पिण्यपसर्पिणीगतिमतः चतुर्विंशतितीर्थङ्करा अरा इव भवन्तीति आर्हतसमयप्रसिद्धमत्र वेदितव्यम् ॥ ८७ ॥

सौगताभिमतमर्थमाह विज्ञानेति । विज्ञानमालयविज्ञानं ; प्राधान्यात्तदेव नाभिर्यस्य तत्तथा । माध्यमिकमते तु शून्यनाभिकम्=शून्यमेव नाभिर्यस्य तत्तथा । शून्यं च :—"न सन्नासन्न सदसन्नोभयाभावरूपते"ति ततसमयाभ्युपगतम् । अविद्यादिभिरिति ; अविद्या-संस्कार विज्ञान-नामरूप-षडायतन-स्पर्श-वेदना-तृष्णा-उपादान-भव-जाति-जरा-

संसाराख्यं महच्चक्रं प्रत्ययैर्विततारकम् ।
सौगतानां नये ज्ञेयं तद्बोधाच्छान्तिरुच्यते ।।८६।।
ऋतनाभं धृति-ज्ञान-समाधिर्नेमिसंयुतम् ।
विनयैर्नियमैश्चैव प्रारब्धारमथापि वा ।।९०।।

मरणादिदुःखानीति द्वादश, तैरित्यर्थः। एतेषामविद्यादिद्वादशानां निरोधैश्च परिवेष्टितं=नेमिरूपेण व्याप्तमित्यर्थः। तथाचोक्तम् :— "यदिदमविज्जापच्चया सङ्खारा, सङ्खारपच्चया विञ्ञानं, विञ्ञानपच्चया नामरूपं, नामरूपपच्चया सलायतनं, सलायतनपच्चया फस्सो, फस्सपच्चया वेदना, वेदनापच्चया तण्हा, तण्हापच्चया उपादानं, उपादानपच्चया भवो, भवपच्चया जाति, जातिपच्चया जरामरणं सोक परिदेवदुक्खदोमनस्सुपायासा सम्भवन्ति ।।" तथा :—"अविज्जायत्वेव असेसविरागनिरोधा सङ्खारनिरोधो, सङ्खारनिरोधा, विञ्ञाननिरोधो, विञ्ञाननिरोधा नामरूपनिरोधो, नामरूपनिरोधा सलायतननिरोधो, सलायतननिरोधा फस्सनिरोधो, फस्सनिरोधा वेदनानिरोधो, वेदनानिरोधा तण्हानिरोधो, तण्हानिरोधा उपादाननिरोधो, उपादाननिरोधा भवनिरोधो, भवनिरोधा जातिनिरोधो, जातिनिरोधा जरामरणं सोकपरिदेवदुक्खदोमनस्सुपायासा निरुज्झन्ति"। इति [उदानं बोधिसूत्तं]। प्रत्ययैरिति= हेतु-आलम्बन-अधिपति-अनन्तर-समनन्तर-सहजात- अन्योऽन्य - निश्रय-उपनिश्रय-पूर्वजात-पश्चाज्जात-आसेवन-कर्म-विपाक-आहार-इन्द्रिय- ध्यान-मार्ग-सम्प्रयुक्त-विप्रयुक्त-अस्ति-नास्ति-विगत-अविगता इति चतुर्विंशतिः सौगतागमप्रसिद्धाः प्रत्ययाः=कार्यकारणानि, तैः वितता अरा यत्र तत्-तादृशम्। संसाराख्यं=जगद्रूपं महत्=अनादिपरम्पराभावेन चलितं चक्रम्। तज्ज्ञानादेव शान्तिः=संसारदुःखोपशमः निर्वाणमिति यावत् भवतीत्युच्यते तज्ज्ञैरिति शेषः ।। ८८-८६ ।।

सौगताभिमतं धर्मचक्रत्वमस्य दर्शयति ऋतनाभमिति। ऋतं=

सद्धर्मचक्रं विततं सुगतेन प्रवर्त्तितम् ।
अनुवर्त्त्य नरः शीघ्रं बुद्धभावं प्रपद्यते ॥६१॥
अविद्यया कृतो बन्धो वृषरूपेण सूच्यते ।
तन्निरोधेन मोक्षःस्यादश्वरूपोपलक्षितः ॥६२॥
सेवाश्वमूर्त्तिर्विज्ञेया संयमो वृषरूपधृक् ।
ताभ्यां प्रवर्त्तितं चक्रं चरखाख्यं सूत्रसाधनम् ॥६३॥

सत्यमेव नाभिर्यस्य तत्तथा । धृतिज्ञानसमाधिभिरेव नेमिरूपेणावस्थितैः संयुतमन्वितम् । विनयै र्नियमैश्च तदागमप्रसिद्धैरारब्धा अरा यस्य तत्तादृशम् । अथापिवेति पक्षान्तरसूचनाय । एवम्भूतं विततमतिविस्तृतं सद्धर्मात्मकं चक्रं भगवता बुद्धेन प्रवर्त्तितम् । तथाचोक्तं सौन्दरानन्दे :—

"अथ धर्मचक्रमृतनाभि
धृतिमतिसमाधिनेमिमत् ।
तत्र विनय-नियमारमृषि-
र्जगतो हिताय प्रावर्त्तयत् ॥" इति

[सौः ३।११]

तच्चक्रानुवर्त्तनस्य फलमाह अनुवर्त्त्येति । बुद्धभावं = बोधिं प्रपद्यते = लभत इत्यर्थः ॥ ॥६०—६१॥

वृषेणाविद्याहेतुको बन्धो बौद्धागमाभिमतः ; अश्वरूपेण चाविद्यादिनिरोधहेतुको दुःखाभावरूपो मोक्षो व्यज्यत इत्याह अविद्ययेति । स्पष्टोऽर्थः ॥६२॥

महात्मगान्धिसमयानुमतमर्थं दर्शयति सेवाश्वमूर्त्तिरित्यादिना । अश्वस्य लोकसेवाकार्यदर्शनात्तेन प्राणिसेवा प्रतीयते वृषस्य च स्थिरस्वभावतया तेन संयमः प्रत्येतव्यः । ताभ्यां सेवाबुद्ध्या संयमेन च

तथा संश्लेष-विश्लेषमयं सूत्रफलं परम् ।
विततं चर्खया सम्यक् सूत्रयज्ञविदो विदुः ॥६४॥
वृषभः पोषणं साक्षाद् राष्ट्रस्य रक्षणं हयः ।
ताभ्यां संसूचितं मुख्यं कार्यं यद्देशवासिनाम् ॥६५॥
अप्राप्तप्रापणं योगः क्षेमः प्राप्तस्य रक्षणम् ।
तयोः संसूचकावश्व-वृषभौ परिकीर्त्तितौ ॥६६॥

प्रवर्त्तितं ; सूत्रसाधनं चर्खाख्यं चक्रं चक्रचिह्नेन प्रत्येतव्यमिति भावः ॥६३॥

अथवा वृषेण संश्लेषः = संयोगो व्यज्यते ; अश्वेन च विश्लेषो = वियोगः प्रतीयते । चक्रेण च चर्खायन्त्रं व्यज्यते । मिलितैरेतैः संयोग-वियोगसाध्यं सूत्रफलकं = सूत्रोत्पत्त्यनुकूल चर्खया सम्यक् = सुष्ठु, विततम् = अनुष्ठितं सूत्रयज्ञमितिशेषः ; सूत्रयज्ञविदः = सूत्रोत्पादनमेव कुटीर-शिल्पप्रतीकभूतं यज्ञत्वेन ज्ञात्वाऽनुष्ठातारो विदुः = जानन्तीत्यर्थः । ६४॥

भारतराष्ट्रप्रतिमत्वमस्या मुद्रायाः प्रतिपादयन् वृषाश्वाभ्यां व्यञ्जितं राष्ट्रवासिनां मुख्यं कर्त्तव्यमाह वृषभः पोषणं साक्षादित्यादिना ।

वृषभस्यान्नसाधनतया राष्ट्रवासिनां पुष्टिप्रयोजकत्वं प्रत्यक्षेण सिद्धम् । ततस्तेन राष्ट्रपोषणं प्रतीयते । तथाश्वस्य युद्धादिसाधनतया राष्ट्ररक्षासाधनत्वं साक्षात्सिद्धम् । अतस्तेन राष्ट्ररक्षणकृत्यं व्यज्यते । एतद् द्वयमेव च राष्ट्रवासिनां स्वकल्यानाय मुख्यं कृत्यम् । एवमाभ्यां तदेव कर्त्तव्यं संसूचितमुपदिष्टमित्यर्थः ॥६५॥

तद्व्यञ्जितमर्थान्तरमाह अप्राप्तेति । अप्राप्तस्य वस्तुनः प्राप्रणं योग इत्युच्यते । प्राप्तस्य च सतो वस्तुनो रक्षणं क्षेमशब्दवाच्यम् । योगक्षेमाभ्यां हि राष्ट्रं समृद्धं भवति :—"योगक्षेमो नः कल्पतामि"ति श्रुतिश्च [यजुः सं २२।२२] । वृषभाश्वौ तयोर्योगक्षेमयोः संसूचकौ =

वृषोऽन्ताराष्ट्रिकी शान्तिः सौख्यं च कामवर्षणात् ।
तद् विधेर्वहनादश्वो बहीराष्ट्रगतो नयः ॥६७॥
ताभ्यां सम्बर्द्धितं पुष्टं राष्ट्रं भारतसंज्ञकम् ।
चक्रेणोपमितं तत्तु सर्वसौख्याय कल्पते ॥६८॥

प्रत्यायकौ । वृषस्य गृहावस्थितस्यैवान्नोत्पादनेन पोषणहेतुत्वात् ; अश्वस्य च देशान्तरं प्रतिवहनकर्त्तृत्वादिति भावः। एवमपि राष्ट्रस्य योगक्षेमसम्पादनेन समृद्धौ राष्ट्रवासिभिः सर्वदा यतितव्यम् इत्युपदेशो व्यञ्जितो भवति ॥६६॥

तत् प्रत्यायितमपरमर्थं प्रतिपादयति वृषोऽन्ताराष्ट्रिकीति । वृषेण राष्ट्राभ्यन्तरस्था शान्तिः सौख्यं च व्यज्येते । कुतस्तदित्याह कामवर्षणादिति । कामवर्षणकर्त्तृतया निष्पन्नत्वाद् वृषशब्दस्य वृषाकृतेरपि स्ववाचकवृषशब्दवाच्यतावच्छेदकावच्छेदेन कामवर्षकत्वावच्छिन्नयोः शान्तिसौख्ययोरुपस्थापकत्वं ; वृषस्य गृहावस्थितत्वात् शान्तस्वभावत्वाच्चेति हृदयम् । अश्वेन तु बहीराष्ट्रीयानीतिर्व्यज्यते । कुत इत्याहः—तद्विधेरिति अन्ताराष्ट्रीयशान्तिसौख्यसम्पादकनीतेः बहीराष्ट्रं प्रति वहनाद्धेतोरित्यर्थः । अश्वस्य वहनकर्त्तृत्वादेव तत्प्रतीतिहेतुतेति भावः ॥६७॥

वृषाश्वाभ्यां सूचितमर्थमुक्त्वा चक्रसूचितमर्थमाह ताभ्यामिति । ताभ्यां=पोषणरक्षणाभ्यां, योगक्षेमाभ्याम्, अन्ताराष्ट्रीय-बहीराष्ट्रीयशान्तिसौख्याभ्यां च सम्बर्द्धितं=समन्वितम् ; पुष्टं—परिपूर्णतां प्राप्तं भारतसंज्ञकं राष्ट्रं चक्रेणोपमितं यत् तदेव सर्वसौख्याय कल्पते=सर्वेषां जनानां मङ्गलमादधातीत्यर्थः ॥६८॥

मुद्राव्यञ्जितमर्थमुपसंहरति कामं वर्षत्वित्यादिद्वयेन । भारतराष्ट्रस्था जनता कामं=प्रार्थितं यत्किञ्चित् वर्षतु=ददातु याचकेभ्य इति शेषः । अयमर्थो वृषेण प्रत्यायितः । एवं कृत्वा च हर्षमेतु । तथा सत्ये रता=सत्यवचनशीला सती राजताम्, इत्ययं "सत्यमेव जयते" इति श्रुतिप्रतिपाद्योऽर्थो दर्शितः । अपिच, स्वातन्त्र्याभयशौर्यवीर्यैः सिंहचतुष्ट-

कामं वर्षतु हर्षमेतु जनता सत्ये रता राजताम्
स्वातन्त्र्याभयशौर्यवीर्यसहिता नित्यं समुद्भासताम् ।
ज्ञानालोकमहाप्रभां वितरतां धर्मार्थकामांस्तथा
लब्ध्वा राष्ट्रसमृद्धयेऽस्तु भुवने दुःखाय मा कस्यचित् ॥९९॥

एतद्भूधरसागरैः परिवृतं नानानदीभिर्युतम्
पूतं तीर्थशतैः सतां सुमहतां सम्भूतिसम्भावितम् ।
प्रान्तैः संहतसन्ततैरुपचितं चक्रं यथारैर्महत्
भूयाद्भारतमण्डलं प्रतिपलं नृणामलं श्रेयसे ॥१००॥

योपस्थापितैः सहिता = समन्विता सती नित्यं जगति समुद्भासतां = दीप्तिं लभतामित्यर्थः । ज्ञानालोकेति । ज्ञानमेवालोकः, तस्य महती प्रभा, तां जगति वितरताम् = विस्तृतिं नयतु । अयमर्थोऽश्वेन सूचितः तस्याग्निप्रत्यायकत्वोक्तेः । तथा च भारतवासिजनता धर्मार्थकामान् लब्ध्वा = स्वयमुपार्ज्योपभुज्य च, राष्ट्रस्य = भारतभूमेः समृद्धये = अभिवृद्धिनिमित्तमस्तु ; भुवने कस्यचिदपि जगद्वासिनो दुःखाय = दुःखनिमित्तं मास्तु = न भवत्वित्यर्थः ॥९९॥

भारतराष्ट्रस्य चक्रोपमत्वेन तदुपस्थाप्यत्वमुपपादयन् तस्य सर्वजन-श्रेयः-साधनसामर्थ्यं प्रार्थयते एतद्भूधरसागरैरिति । एतद् भारत-मण्डलं = भारताख्यं राष्ट्रं, प्रतिपलं = प्रतिक्षणमनवरतमितियावत् । नृणां = मानवमात्रस्य श्रेयसे = मङ्गलं साधयितुम्, अलं = समर्थं भूयात् । किम्भूतं भारतमण्डलम् ? भूधरसागरैः नेम्युपमैः परिवृतं = परिवेष्टितम् ; नानानदीभिः = गङ्गा-यमुना-सरस्वती-सिन्धु-लौहित्य-गोदावरी-कावेरी-नर्मदा-प्रभृतिभिः युतं समन्वितम् ; तीर्थशतैः = अगणितैः तीर्थक्षेत्रैः पूतं = पवित्रम् ; सुमहतां = भगवदवतारभूतानां

पताकाम्नायः

उत्तरार्द्धम्

अथ पताकाव्यञ्जितार्थवर्णनम्

—:०:—

रूपं लोहित-शुक्लकृष्णमपि वा भूतं च भव्यं भवत्
जन्मावस्थितिभङ्गमेवमथवाऽनेकं यदेकं च सत् ।
देशं कालमवस्थितिं च यमयत्यन्तः परं ब्रह्मवत्
प्राकाम्यं दधदेव भातु भुवने राष्ट्रध्वजो नश्चिरम् ॥१॥

मुद्राव्यञ्जितार्थव्याख्यानानन्तरं पताकाव्यञ्जितार्थव्याख्यानं प्रारभमाणः प्रथमं सर्वात्मकत्वेन पताकायाः परमब्रह्मोपमत्वं प्रतिपाद्य तस्यास्तदधिष्ठानस्य भारतराष्ट्रस्य च चिरसमृद्धिमाशंसति रूपमिति । परं ब्रह्म हि स्वशक्त्या मायया रोहितशुक्लकृष्णं = रजःसत्त्वतमोगुणात्मकं रूपं = जगतः प्रकृतिभावमापद्यते ;—

"अजामेकां लोहितशुक्लकृष्णां
बह्वीः प्रजाः सृजमानां सरूपाम् ।
अजोह्येको जुषमाणोऽनुशेते
जहात्येनां भुक्तभोगामजोऽन्यः ॥"

[श्वेः उः ४।५]

इति श्रुतेः । अपिवेति समुच्चये । भूतं भव्यं भवच्च = कालात्मना अतीतानागतवर्त्तमानमिति त्रितयम्—"पुरुषएवेदं सर्वं यद्भूतं यच्च भव्यमि"त्यादि [ऋक् सं, १०।७।९०।२] श्रुतेः । अथवेत्यपि समुच्चये । जन्मावस्थितिभङ्गम् = जगत उत्पत्ति-स्थितिलयं ब्रह्मविष्णुशिवात्मना,



"यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्य-भिसंविशन्ति"। [तैः उः ३।१] इति श्रुतेः। एवमनेकं=नानारूपेणाव-स्थितमपि,—"इन्द्रो मायाभिः पुरु रूप ईयते"। [बृः उः, २।५।१६]

इति श्रुतेः। वस्तुतस्तु सदेकं च "सदेव सौम्येदमग्र आसीदेक-मेवाद्वितीयम्।" [छाः उः ६।१।१] इत्यादि श्रुतेः। तथा देशं कालमवस्थां च तदन्तः प्रविश्य यमयति=नियन्त्रयति=यः पृथिव्या-मित्यादि प्रागुपन्यस्तश्रुतेः

"योऽन्तः प्रविश्य भूतानि भूतैरत्त्यखिलाश्रयः।
स विष्णवाख्योऽधियज्ञोऽसौ कालःकलयतां प्रभुः॥"

[भाः ३।२६।३३]

इत्यादिस्मृतेश्च। तथा प्राकाम्यमुपासकानां यथाकामं रूपं दधाति

"चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः।
उपासकानां कार्य्यार्थं ब्रह्मणो रूपकल्पना॥"

इत्यादिस्मृतेः। तद्वदयं राष्ट्रध्वजोऽपि सत्त्वरजस्तमोगुणात्मकं, वर्त्तमानातीतभविष्यदात्मकं कालत्रितयं, शुक्लरक्तकृष्णेति वर्णत्रितयेन व्यञ्जकतया दधाति, व्यङ्ग्यव्यञ्जकयोरभेदोपचारात्। एवमवयवशो-ऽनेकात्मकोऽपि अवयविरूपेणैकबुद्धिविषयतयैकः सन् भारतवर्षस्य देशभेदं कालभेदमवस्थाभेदं चैकत्रात्मनि यमयति=विधृत्य तिष्ठति, सङ्केतेन प्रत्याययतीति यावत्। तथा प्राकाम्यं=देशवासिनां स्वस्वाभिमतं रूपं-दधान आस्ते। एवम्भूतो नः=अस्माकं भारतराष्ट्रस्थानां राष्ट्रध्वजो =राष्ट्रीयपताका भुवने भातु=उड्डीयमाना सती चिरं राजतामित्यर्थः। न च राष्ट्रीयध्वजस्यार्वाचीनत्वमाशङ्कनीयम्—

"अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु"। [ऋक् सं १०।६।१०३] इत्यादि श्रुतिदर्शनात्॥१॥

मधुजम्बीरवर्णाभं रक्तशब्देन लक्ष्यते ।
दूर्वाश्यामं तु कृष्णेण कार्पासाभं च शुक्लतः ॥२॥
कीलकं पुरुषं विद्यात् प्रधानं वाससं तयोः ।
सम्बन्धहेतुं तद्रज्जुं येन सर्गः प्रवर्त्तते ॥३॥
शुक्लः कृष्णश्च रक्तश्च त्रिवर्णाः प्रकृतेर्गुणाः ।
अजामेकामितिश्रुतेस्तेजोऽवन्नसरूपतः ॥४॥

अत्र प्रयुक्तरोहितादिशब्दलक्षितमर्थमाह मधुजम्बीरवर्णाभमिति । वर्णानां सत्त्वरजस्तमोरूपत्वात् सत्त्वरजस्तमसां च सर्वत्र मिलितावस्थानाभ्युपगमात् पताकायां मिलितरागयोर्गैरिकश्यामयोर्ग्रहणम् । शुद्धसत्त्वस्य तु मोक्षोपयोगित्वोक्तेस्तदुपमानत्वेन शुक्लस्य शुद्धस्यैव ग्रहणमिति-हृदयम् । स्पष्टमन्यत ॥२॥

पताकागतैरवयवैः सूचितानर्थान् ब्रुवाणस्तस्याः सांख्याभिमतं विश्वरूपत्वं प्रथममुद्घोषयति किलकमित्यादिभिः । कीलकः=पताकाऽधिष्ठानभूतः स्तम्भः; तं पुरुषं=जीवात्मानं विद्यात्=जानीयात् अधिष्ठानत्वसाम्यात् । वाससं=पताकोपादानभूतं वस्त्रं, प्रधानं=प्रकृतिस्वरूपं प्रकृतिप्रत्यायकमिति यावत्; विद्यात् त्रिगुणत्वादिसाम्यात् । तद्रज्जुं=स्तम्भवस्त्रयोः संयोगसाधनं; तयोः=प्रकृतिपुरुषयोः सम्बन्धहेतुं=संसर्गकारणमविवेकाख्यं विद्यात् वन्धनहेतुत्वसाम्यात् । कीदृशः सम्बन्धहेतुरित्याह येनेति । येनाविवेकेन सम्बन्धहेतुना सर्गः=जगत्सृष्टिः प्रवर्त्तते तादृश इत्यर्थः । एवमुपवर्णितपताकाऽवयवानां यथायोगं सम्बन्धात् भारतराष्ट्रस्य कार्यप्रवृत्तिरिति ध्वनितम् ॥३॥

वस्त्रस्य प्रकृतिसाम्यं सप्रमाणमुपवर्णयति शुक्ल इति । "अजामेकां लोहितशुक्लकृष्णाम"—इति श्रुतिः प्रागेवोपन्यस्ता; तेजोऽवन्नसरूपत्वश्रुतिस्तु यथा—

वाससश्चलता क्षोभो विपरिणाम एव च ।
यदुत्थापनमेतस्य कीलबद्धस्य वाससः ॥५॥
तत्सर्गोन्मुखता तस्य सृजते तनुते च यत् ।
तथावतिष्ठते यत्तु तत्सर्गस्थितिरुच्यते ॥६॥
यत्संकोचनमेतस्य तल्लयावस्थितिर्मता ।
यन्नामयति तद्विद्याद् विपरीतक्रमं लये ॥७॥

"तत् तेजोऽसृजत" ; "तदपोऽसृजत" ; ता अन्नमसृजन्त"—इति [छाः उः ६।२।३-४]।

"यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां, यत् कृष्णं तदन्नस्ये"ति च [छाः उः ६।४।१] ॥४॥

पताकावाससो या चलता = यच्चाञ्चल्यं तया प्रकृतिक्षोभः = प्रधानस्य गुणवैषम्यरूपः विपरिणामः = प्रतिक्षणमवस्थान्तरप्राप्तिः ; लक्ष्यतेऽवगम्यते । एवं राष्ट्रस्य च द्रुतगत्या सम्बर्द्धनं व्यज्यत इति भावः । कीलबद्धस्य = स्तम्भगतस्य, एतस्य = वाससः पताकात्मकस्य यदुत्थापनं तत् प्रधानस्य सर्गोन्मुखता = सृष्टिप्रक्रमः ; विशेयेतिशेषः । एतेन राष्ट्रस्य कार्यारम्भ इत्यपि ध्वनितम् । यत् तनुते = वस्त्रं विस्तीर्यते तदेव सृष्टिक्रियेति मन्तव्यम् । राष्ट्रपक्षे तु तत्कार्यपरिचालनक्रियेति व्यज्यते । तथा यदुत्थापितावस्था साऽवतिष्ठते = तादृशावस्थानमेव सृष्टेः स्थितिरिति मन्तव्यम् । राष्ट्रकार्याणां च सक्रियावस्थानं तेन व्यज्यत इति भावः । एतस्य = पताकावाससः संकोचनं = सम्वरणं ; तदेव सृष्टिक्रियाया लयावस्थितिः = लयौन्मुख्यावस्थयाऽभेदेन मता = अभिमता राष्ट्रकार्यस्य च संवरणं तेन व्यज्यत इतिभावः । यन्नामयति = पताकामवरोहयति तदेव लये = जगतः प्रलये विपरीतक्रमं विद्यात् ; सृष्टिक्रमतो लयक्रमस्यारोहणाच्चावरोहक्रमस्य वैपरीत्यात् । तेन राष्ट्रकार्यस्य विश्रान्त्यवसरो

कीलस्य तद्वियोगेन कैवल्यमुपजायते ।
योगदृष्ट्याऽथवा कीलं पुरुषं परमेश्वरम् ॥८॥
विद्यात् चक्रस्वरूपं तु प्रागेव प्रतिपादितम् ।
तथौपनिषदानां यदन्यथाऽपि भवेच्छृणु ॥९॥
मायिनं कीलकं विद्यान्मायां तु वसनाकृतिम् ।
कार्यकारणभावात्मा रज्जुरन्यद्यथोदितम् ॥१०॥

व्यज्यत इति बोध्यम्। तद्वियोगेन कीलस्य यत् कैवल्यं जायते तेन प्रकृतिवियोगेनात्मनः कैवल्यं जायत इति प्रत्येतव्यम्। राष्ट्रकार्यस्य च तेन विरामो व्यज्यत इत्यभिप्रायः। एवं ध्वजस्य युगपदेव सांख्यसिद्धान्तावगमकत्वं राष्ट्रगतावस्थाभेद-व्यञ्जकत्वं चेति प्रतिपादितम् ॥

योगदर्शनाभिमते विशेषमाह योगदृष्ट्येति। तन्मते ईश्वराभ्युपगमात्। कीलकेनात्मत्वसाम्यादीश्वरजीवावुभावेव ग्राह्याविति भावः।

चक्रस्वरूपं तद्व्यञ्जितश्चार्थः प्रागेव मुद्राव्यञ्जितार्थविवरणावसरे—"सोमाग्निविधृतं चक्रमि"त्यादिभिर्बहुधा प्रतिपादित इति तदेवात्रापि यथायोगं स्मर्त्तव्यम्। सांख्ययोगनये "अव्यक्तनाभं व्यक्तारमि"त्यादि महाभारतवाक्योपन्यासेन विवृतश्चक्रार्थः सङ्गमनीयः स्यात् ॥

औपनिषदानां मते ध्वजेन संसूचितमर्थान्तरमपि यद्भवेत्तदपि वक्तुं प्रतिजानीते तथौपनिषदानामिति ॥ ५—६ ॥

प्रतिज्ञातमर्थान्तरमाह मायिनमिति। मायाश्रयं परमेश्वरं कीलकेन प्रत्यायितं विद्यात्—"मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।" इति [श्वेः उः ४।१०] श्रुतेः। मायामेव वासनाख्यां वस्त्रेण सङ्केतितां विद्यात् आवरणक्रियासाम्यात्। कार्यकारणभावो रज्ज्वा सङ्केतितः शृङ्खलासादृश्यात्। अन्यत्तु वर्णचक्रादिभिः सूचितमर्थं प्रागुक्तमेवात्रापि गृह्णीयादिति भावः ॥ १० ॥

शौक्ल्यं तु निर्मलं ज्ञानं कार्ष्ण्यं कर्म च तद्गतम् ।
रक्तो रागात्मिकाभक्तिस्त्रिभिर्वर्णैस्त्रयं विदुः ॥११॥
जीवात्मा कीलकं तत्र वासोन्तःकरणं स्मृतम् ।
अविद्याबन्धनं रज्जुस्तयोः सम्बन्धसाधनम् ॥१२॥
कीलकं बोधिरूपं वा वासस्तु वासनात्मकम् ।
त्रिरत्नं तत् त्रयो वर्णाश्चाञ्चल्यं क्षणभङ्गुता ॥१३॥

अपरमर्थमाह शौक्ल्यंत्विति । शुक्लवर्णेन निर्मलं=विशुद्धं शुद्धसत्त्वात्मकं ज्ञानं प्रत्याय्यते स्वच्छता साम्यात् । तद्गतं=वस्त्रगतम् । कार्ष्ण्यं=कृष्णगुणः ; कर्म=प्राणिनां कर्मवासनामुपस्थापयति अविद्यासम्बन्धित्वसाम्यात् । रागात्मिकेति हेतुगर्भं विशेषणम् ; रञ्जनात्मकत्वाद् रक्तेन भक्तिर्व्यज्यते । एवं शुक्लकृष्णरक्तैः ज्ञानकर्मभक्तयः साक्षात् परम्परया वा पुरुषार्थसाधनत्वेन गीतादिशास्त्रोक्ताः प्रतिपाद्यन्त इति तद्विदो जानन्ति ॥ ११ ॥

एतत्पक्षे च कीलको जीवात्मा ; आश्रयत्वसाम्यात् । वासोऽन्तःकरणम्=आवरणचाञ्चल्यादिसाम्यात् । रज्जुः तयोरात्मान्तःकरणयोः सम्बन्धसाधनम्, अविद्याबन्धनम्=अविद्यात्मकं बन्धनं कार्यसाम्यात् । प्रत्याय्यप्रत्यायकयोरभेदोपचारात् समानविभक्त्यन्तत्वसङ्गतिः । एवमन्यत्रापि ज्ञेयम् ॥ १२ ॥

बौद्धसम्मतमर्थमाह कीलकमिति । कीलकेन बोधिः=तत्त्वज्ञानं प्रतीयते प्राधान्यसाम्यात् स्थानुत्वेन बोधिद्रुमोपमत्वाच्च । वाससा वासनारूपं जगत्कारणम् एकधातुनिष्पन्नशब्दोपस्थाप्यत्वसाम्यात् । त्रिभिर्वर्णैः बुद्धशरणं, सङ्घशरणं धर्मशरणमितिरत्नत्रयम् ; वासोगतेन चाञ्चल्येन क्षणभङ्गसिद्धान्तः प्रतीयते । सा=क्षणभङ्गता वस्तूनां स्वभावः "यत् सत्तत् क्षणिकं यथा जलधर" इति तत्सिद्धान्तात् । रज्ज्वा संसारस्य

स्वभावो वस्तुनः सा तु रज्जुः संसारबन्धनम् ।
कार्यकारणचक्रं तद् धर्मात्मकमथापि वा ॥१४॥
जिनं वा कीलकं विद्याद् वासोऽन्तःकरणं तथा ।
ज्ञानं कर्म च भक्तिश्च वर्णत्रितयव्यञ्जिताः ॥१५॥
यज्ञस्य वस्त्ररूपत्वं तन्तूनां जगदात्मता ।
समामनन्ति तत्रस्थं चक्रं यज्ञात्मकं ततः ॥१६॥

बन्धनात्मकता चक्रेण च कार्यकारण-पारम्पर्यं "विज्ञाननाभिकर्मि"त्या-द्युक्तम्। अथवा धर्मात्मकम्=ऋतनाभमित्यादि प्रागुक्तमुपस्थाप्यते इत्यर्थः। एवं बौद्धसमयसिद्धाः पदार्थाः समासेन सूचिता भवन्तीति भावः॥ १३—१४ ॥

जैनसमयाभिमतमर्थमाह जिनं वेति। सुस्पष्टोऽर्थः। अत्रापि रज्ज्वा संसारबन्धनं व्यज्यत इति पूर्वोक्तमेव स्मर्त्तव्यम्। चक्रं तु प्रागेव व्याख्यातम्॥ १५ ॥

वैदिकसमयसिद्धमर्थमाह यज्ञस्येति। वस्त्रेण यज्ञ उपस्थाप्यते, तन्तुभिश्च वस्त्रस्वरूपघटकैः समग्रं जागतिकपदार्थजातम्; "नाहं तन्तुं न विजानाम्योतु नवं वयन्ति समरेऽतमाना"। इति [ऋक् सं ६।९।२] यज्ञस्य वस्त्ररूपत्वश्रुतेः—

"यो यज्ञो विश्वतस्तन्तुभिस्तत
एकशतं देवकर्मभिरायतः।"

[ऋक् सं १०।१३०।१]

इति वियदादिकार्याणां तन्तुरूपत्वश्रुत्या सर्गात्मकस्य यज्ञस्य वस्त्ररूपत्वसिद्धेश्च। चक्रस्य सृष्टियज्ञरूपता प्राङ्निदर्शिता॥ १६ ॥

स्तम्भेन यागफलं व्यज्यते फलबन्धनत्वाद् यज्ञस्य। यज्ञजन्योऽदृष्टोऽपूर्वनामा यः कैश्चिद्धर्मत्वेनाभ्युपगम्यते स एव रज्ज्वा व्यज्यत

तत्र यागफलं स्तम्भो रज्जुश्चादृष्टसूचिका ।
स्वजन्यादृष्टधर्मेण यज्ञः स्यात् फलबन्धनः ॥१७॥
नित्यं नैमित्तिक काम्यं सत्त्वादिगुणतोऽथवा ।
त्रैविध्यं सूच्यते यस्य वर्णैः शुक्लादिभिस्त्रिभिः ॥१८॥
चित्रावस्थानभाषाभिर्विततं भारतं जनाः ।
नाना तन्तुवितानेन वस्त्रेणोपमितं विदुः ॥१९॥
किरात-द्रविडार्याणां त्रिवर्णैर्मेलनं तथा ।
अर्वाचीनेतिहासज्ञैरभ्युपेतमिदं यतः ॥२०॥

इत्यर्थः, फल-यज्ञयोः सम्बन्धघटकत्वात्तस्येति भावः । एतदेवोपपादयति स्वजन्येति । यज्ञजन्येनादृष्टेन धर्मस्वरूपघटकीभूतव्यापारेण यज्ञफलयोः कार्यकारणभावाख्यः सम्बन्धो घटते यतः अत इत्यर्थः । त्रिभिः शुक्लादिभिः वर्णैः कर्मणो नित्यनैमित्तिककाम्यभेदेन, सात्त्विक-राजसिक-तामसिकभेदेन वा त्रैविध्यं द्योत्यते । एवं वैदिकानां कर्मवादोऽनेन व्यक्तो भवतीति ध्येयम् ॥ १७—१८ ॥

पताकाया भारतवर्षोपस्थापकत्वमुपपादयति चित्रावस्थानभाषाभिरिति । चित्रं = विचित्रं नानाविधमितियावत् । अवस्थानं = देशोऽवस्था च ; भाषा = वाणी ; तैः विततं = विस्तृतं भारतवर्षं = भारतराष्ट्रम् ; वस्त्रेणोपमितं = वस्त्रेण स्वोपमानतया व्यञ्जितं जना विदुरित्यन्वयः । केन प्रकारेण व्यञ्जितमित्याह नानातन्तुवितानेनेति । वस्त्रस्य तन्तुरूपनानोपादानत्वाद् विस्तृतत्वाच्च, तथा भारतवर्षस्यापि नानाविधावयवघटितत्वाद् विस्तृतत्वाच्च तयोः साधर्म्यावगमात तेन तदुपमानं युक्तमिति भावः ॥ १९ ॥

वर्णत्रितयेन तत्राङ्कितचक्रेण च भारतवर्षरूपव्यञ्जकत्वं दर्शयति

तत् केन्द्रनाभं राज्यारं जनतानेमिवेष्टितम् ।
नानावर्णदलोपेतं पद्मं ब्रह्मोद्भवं यथा ॥२१॥
नालेनोपमिते साम्ये सम्बद्धं प्रेमतन्तुना ।
चक्रं भारतवर्षस्य साक्षात्सारूप्यमश्नुते ॥२२॥

किरातेति । रक्तशुक्लकृष्णैस्त्रिभिर्वर्णैः किरातद्रविडार्याणां = मंगोलीयाष्ट्र-कार्यत्वेनाधुनिकनृतत्त्वविद्भिरभ्युपगतानां मानवगोष्ठीनामुपस्थापनं वर्ण-साम्यात् । तद्वर्णत्रयसम्मेलनेन तासां मानवगोष्ठीनामपि सम्मेलनमत्र व्यज्यते । प्राचीनभारतीयशास्त्रे श्वेतादृशमिलनवार्त्ताया अनुपलभ्य-मानत्वादेतादृशकल्पनाया निर्मूलत्वशङ्कां वारयन्नाह अर्वाचीनेतिहासज्ञै-रिति ॥ २० ॥

एतत्पक्षे चक्रोपस्थाप्यमर्थमाह तत्केन्द्रनाभमिति । तद् राष्ट्रीय-पताकागतं चक्रं ; केन्द्रीनाभं = केन्द्रीयाधिशासनमेव नाभिर्यस्य तत्तथा । राज्यारं = राज्यिकाधिशासनान्येव अरा यस्य तत्तथा । जनतानेमि-वेष्टितं = जनता-जनसमूहः ; सैव नेमिः, तेन वेष्टितं = परिवृतं चक्रं = चक्राकारम् । कीदृशं तत् ? नानावर्णदलोपेतं = विविधैर्वर्णैः दलैश्च युक्तम् । उपमेयपक्षे वर्णशब्दो जाति-सम्प्रदायादिभेदपरः, दलशब्दश्च समानमतानुसारिजनतापरः । उपमान पक्षे तु स्पष्टोऽर्थः । ब्रह्मोद्भवं = ब्रह्मण उत्पत्तिस्थानं पद्मं यथा = भगवन्नाभिकमलमिवेत्यर्थः । पुनः किम्भूतम् ? नालेनोपमिते = पद्मनालसदृशे साम्ये = सर्वसाम्यनीतो स्तम्भे ; प्रेमतन्तुना = पद्मतन्तुसरूपया प्रेमात्मिकया रज्ज्वा ; सम्बद्धं = सम्यक्बद्धम् । एवम्भूतं भगवन्नाभिकमलोपमं चक्रमवयवशः समुदायेन च भारतवर्षस्य = भारतराष्ट्रस्य, साक्षात्सारूप्यं = समानरूपतां साधर्म्य-मिति यावत् अश्नुते । तेन भारतीयशासनतन्त्रं, समग्रमेव वा भारतराष्ट्र-मनेन चक्रेण बुद्धावारोहतीति प्रतिपादितं भवति ॥ २१—२२ ॥

अपरमर्थमाह तथेति । शैलगणः = हिमवद्विन्ध्यादि-पर्वतमाला,

तथाशैलगणस्तम्भे नदीभीरज्जुभिर्यथा ।
सम्बद्धं भारतं वर्षं चक्रं समुद्रवाससम् ॥२३॥
एतद्देशप्रसूतानां जनानां किल जीवनम् ।
विद्यात् परस्परापेक्षं तन्तूनामिव वाससि ॥२४ ॥
तस्माद् ज्ञानेन वीर्येण दानेन परिचर्यया ।
परसेवापरो भूत्वा रक्षेदात्मानमात्मना ॥२५॥
सर्वेषां भारतस्थानां तत्कृत्यमुपदिश्यते ।
वसनेन त्रिभिर्वर्णैः कार्येण कारणेन च ॥२६॥

स एव स्तम्भः = स्तम्भरूपस्तस्मिन् ; नद्यो रज्जुसदृशाः, ताभिः सम्बद्धं = संहतम् । समुद्रवाससं = समुद्र एव वासोरूपं यस्य तत्तथा । भारतवर्षं = भारतराष्ट्रं निरुक्तरूपेण चक्रसदृशम् । तस्मात् पताकया सादृश्यद्वारेण गिरिनदीसमुद्रसमन्वितो भारतदेशो जनताबुद्धावारोहतीति भावः ॥ २३ ॥

एतद्देशप्रसूतानां = भारतवर्षवासिनां जनानां वस्त्रगततन्तुभिः प्रत्यायितानां ; जीवनं = स्थितिः किल परस्परसापेक्षम् । एतच्च तन्तुगतसंयोगेन पटासमवायिकारणात्मना व्यज्यते । शुक्लवर्णेन ज्ञानं व्यज्यते, कृष्णवर्णेन कर्मव्यञ्जकेन कर्मकारणीभूतस्य वीर्यस्यापि व्यञ्जनं युज्यते । तथा रक्तस्यानुरागव्यञ्जकत्वोक्तेरनुरागकार्ययोः दान-परिचर्ययोरपि व्यञ्जकत्वं सिद्ध्यति । वसनकार्यमावरणादि परोपकारः, तेन परसेवा व्यज्यते । इत्थं पताकास्वरूप-घटकतन्तु-तन्तुसंयोगाभ्यां जनतागत परस्परसापेक्षत्वस्य, पताकागतवर्णैः ज्ञानवीर्यदान-परिचर्याणां ज्ञानकर्मानुरागाणां च वसनगतपारार्थ्येन परसेवायाश्चोपस्थापनात् ; तदुपस्थितानां चार्थानां शब्दोपस्थापितानामिवाकांक्षायोग्यतासत्तितात्पर्यवशात् पर-

त्यागोत्साहौ च रक्तेन शान्तिः सत्यं च शुक्लतः ।
श्यामाद् विश्वास-वीर्ये द्वे दयाऽथापि प्रतीयते ॥२७॥
राष्ट्रस्याग्रगतिं विद्यात् तन्मध्यस्थितचक्रतः ।
तदर्थं सततं कर्माचरणं देशवासिनाम् ॥२८॥
वैराग्यं विषये लोकसुखायात्मविसर्जनम् ।
गैरिकेन प्रतीयेत सत्यं ज्ञानं च शुक्लतः ॥२९॥
श्यामेनौषधिभिः पूर्णा भूमिः कल्पलतोपमा ।
एतेषां समवायेन जनानां सुखमेधते ॥३०॥

स्परान्वयाभ्युपगमात् वाक्यार्थ इव योऽर्थो बुद्धयारूढो भवति तमर्थमाह एतद्देशप्रसूतानामित्यादित्रयेण । कार्येण = वसनकार्येण, पारार्थ्येन; कारणेन = तत्कारणेन तन्तुभिः तन्तुसंयोगैश्च । स्पष्टमन्यत् ॥ २४-२६ ॥

राष्ट्रीयमहासभा[1]ऽभिमतमर्थं दर्शयति त्यागोत्साहाविति । स्पष्टः श्लोकार्थः । वर्णानामेतदर्थोपस्थापकत्वमेकत्रिंशाधिकैकोनविंशशततम (१९३१) खृष्टाब्दीयाखिलभारतीय राष्ट्रीयमहासभायां गृहीतं प्रकाशितं च[2] । चक्रसङ्केतितश्चार्थो वर्णितो भारतीय गणपरिषदधिवेशने तत्र भवता भारतराष्ट्रप्रधानमन्त्रिणा श्रीजवहरलाल नेहरुमहाभागेन[3] ॥२७—२८॥

आचार्यराधाकृष्ण[4]वर्णितमर्थमाह वैराग्यमित्यादिद्वयेन । अतिरोहितार्थौ श्लोकौ ॥ २९—३० ॥

---

1. All India Congress Committee.

2. See "Our Flag"—Published by the Publication division, Ministry of Information and Broadcasting, Government of India, 1952, page 9.

3. See "Our Flag" page 12.

4. Dr. S. Radhakrishnan. See "Our Flag" page 14.

धर्मेण सत्येन तथार्जवेन
प्रवर्त्तितं भारतराष्ट्रतन्त्रम् ।
वृत्तिं जनानामपि धर्मयुक्तां
सत्याश्रितां शंसति धर्मचक्रम् ॥३१॥
निमित्तं कालमादाय सर्वेषां धर्मकर्मणि ।
प्रवृत्तिर्दृश्यते तस्मात् कालः स्याद्धर्मसाधनम् ॥३२॥
सम्वत्सरात्मा कालोऽसौ चक्रवत् परिवर्त्तते ।
तस्मात् कालात्मकं धर्मचक्रं स्यात् सर्वसम्मतम् ॥३३॥

चक्रसङ्केतितं तदभिमतमर्थमाह धर्मेणेति। भारतराष्ट्रतन्त्रं = भारतराष्ट्रस्य शासनम्। एतत्त्रयेण प्रवर्त्तितं = प्रवर्त्तते इत्यर्थः। भारतीयजनानां या वृत्तिः = प्रजीवनं व्यापारश्च; तदपि धर्मादनपेतं सत्ये प्रतिष्ठितं चेति पताकागतं धर्मचक्रं = धर्मप्रवर्त्तकं चक्रं कर्त्तृ शंसति प्रत्याययति। एवमेतन्मतेऽपि पताकया भारतराष्ट्रशासननीति-र्व्यज्यते ॥ ३१ ॥

चक्रस्य सर्वधर्मानुमतार्थव्यञ्जकतया सर्वमान्यत्वं प्रतिपादयति निमित्तं कालमादायेत्यादिभिः पञ्चभिः। सर्वेषां = यत्किंचिद्धर्मावलम्बिनां नास्तिकानां च सर्वधर्मबहिर्भूतानाम्। धर्मकर्मणीत्युपलक्षणम्; तेन स्वस्वधर्मकर्मणि = अदृष्टार्थके कर्मणि, नास्तिकपक्षे दृष्टार्थककर्त्तव्य-कर्मण्यपि कालं = तत्तन्निर्दिष्टतिथि-वारमासवर्षादीन् निमित्तीकृत्य प्रवृत्ति-र्दृश्यते यतस्तस्मात् सर्वेषां मते कालः धर्मसाधनं, नास्तिकाभिमत कर्त्तव्यकर्मसाधनं चाभ्युपगन्तव्यम् ॥ ३२ ॥

स च कालः सम्वत्सरात्मतया चक्रवत् परिवर्त्तत इति यत् प्रागुक्तं तदपि सर्वसम्मतमित्यवश्याभ्युपेयम्। तस्मात् पूर्ववर्णितं कालात्मकं यच्चक्रं तदेव धर्मसाधनतया स्वस्वाभिमतधर्मोपमानत्वेन च धर्मचक्रेति

चन्द्रविम्बात्मकं चक्रं ह्रासवृद्धिप्रमाणतः ।
निमित्तं धर्मचर्यायामाहुर्माहम्मदा अपि ॥३४॥
तिथेर्मासस्य वर्षस्य पक्षस्य वासरस्य वा ।
आवृत्त्या चक्रवद्धर्मानुष्ठानं सर्वसम्मतम् ॥३५॥
तस्मान्माहम्मदाः शिख्या यिशवीयादयश्च ये ।
सर्वे कालात्मकं चक्रं मन्येरन् धर्मसाधनम् ॥३६॥
ईश्वरप्रतिमः स्तम्भः जीवा वस्त्रस्य तन्तवः ।
ईशशक्तिस्तथारज्जुस्तयोः सम्बन्धसाधनम् ॥३७॥
एवं सर्वात्मके चक्रे सूत्रे मणिगणा इव ।
सर्वेऽत्र ग्रथिता धर्माः सम्प्रदायाश्च तत्त्वतः ॥३८॥

व्यपदेशभाक्, सर्वजनपूज्यं चेत्यत्र नास्ति कस्यचिद् विमतिरित्युक्तमनेन ॥ ३३ ॥

अत्रोदाहरणत्वेन, माहम्मदधर्माचरणे चन्द्रोदयोपलक्षितकालात्मकचक्रस्य निमित्तभावमुपन्यस्यति चन्द्रविम्बात्मकमिति । चन्द्रविम्बात्मकम् = चन्द्रविम्बोपलक्षितमित्यर्थः । स्पष्टमन्यत् ॥ ३४ ॥

धर्मान्तरेष्वपि तथैव तिथिवारादीनां चक्रवत् परिवर्त्तमानानां साधनत्वमाह तिथेर्मासस्य वर्षस्येति ॥ ३५ ॥

कालचक्रस्य सर्वसम्मतत्वमुपसंहरन् तस्य सर्वमान्यत्वविधिमाह तस्मादिति । स्पष्टार्थाः श्लोकाः ॥ ३६ ॥

ईश्वरसद्भावं तद्भक्तेः पुरुषार्थसाधनतां च मन्यमानानां सर्वेषामेव विभिन्नधर्मावलम्बिनां माहम्मद-यिशवीयादीनामपि सम्मतमर्थं प्रत्याययदिदं धर्मचक्रं सर्वधर्मसम्प्रदायानां समन्वयसाधनं भवतीत्यर्थमाह ईश्वरप्रतिम इत्यादिना द्वयेन । अतिरोहितार्थमेतत् ॥ ३७—३८ ॥

एवं पारशिकैर्ग्रीचैरासिरीयाख्यजातिभिः ।
इजिप्तैरपि ततसूर्यमण्डलत्वेन कल्पितम् ॥३९॥
आसीत् सम्पूजितं चैव चक्रं धर्मार्थिभिर्यथा ।
तथा निदर्शनं लब्धं पुरातत्त्वविदो विदुः ॥४०॥
आदौ भगवता यत्तु धर्मचक्रं प्रवर्त्तितम् ।
आवर्त्तयति कल्पादौ प्रजाः सृष्ट्वा प्रजापतिः ॥४१॥
मनुनाऽवर्त्तितं तत्तु ततश्चान्यैर्महर्षिभिः ।
श्रीरामेणापि भीष्मेण वसुदेवसुतेन च ॥४२॥
महावीरेण बुद्धेन धर्माशोकादिभिस्तथा ।
आचार्यशङ्कराद्यैश्च तथान्यैर्धर्मदर्शिभिः ॥४३॥
महम्मदेन यिशुना जरथुष्ट्रेण चान्यतः ।
गुरुभिर्नानकाद्यैश्च सम्प्रदायप्रवर्त्तकैः ॥४४॥

पुरा पृथिव्यां भारतवर्षादन्यत्रापि चक्रमिदं प्रागुक्तरीत्या सूर्यमण्डलप्रतिमात्वेन गृहीतं पूजितं चाभूदिति[1] विज्ञापयन्नाह एवमिति। स्पष्टार्थम् ॥ ३९—४० ॥

धर्मचक्रप्रवर्त्तनस्यार्वाचीनत्वशङ्कां निराकुर्वन् तस्य सर्वसम्प्रदायसङ्गतत्वं च प्रतिपादयन्नाह आदावित्यादि :—'यत्र पूर्वाभिसर्गे वै धर्मचक्रं प्रवर्त्तितम्"। इति ; "भीष्मेण विहितं राष्ट्रे धर्मचक्रमवर्त्तत"। इति च [आदि पः १०६।१४] महाभारतवाक्यमत्र स्मर्त्तव्यम्। वाह्यावरणं = चक्रस्य दृष्टं रूपं ; तस्य भेदेऽपि = अष्टार-द्वादशार-षोडशार-द्वात्रिंशदर-षष्ट्यधिकत्रिशतारादिभेदेन नानात्वेऽपि, तथा

---

1. See "Our Flag"—page 14.

साम्प्रतं देशिकेन्द्रेण गान्धिनावर्त्तितं पुनः ।
साधवश्चानुवर्त्तन्ते बिनोबाप्रमुखा अपि ॥४५॥
तत्रावर्त्तकभेदेन रुचेर्द्दष्टेश्च भेदतः ।
वाह्यावरणभेदेऽपि चक्रवृत्तिर्न भिद्यते ॥४६॥


तद्धर्मचक्रं जनचित्तबद्धं
मनोऽनुकूलं तदुपासकानाम् ।
आवर्त्तते निर्गुणब्रह्मतत्त्वं
यथा सरूपं सगुणं च भाति ॥४७॥

उत्थापनं नामनं च ध्वजस्यानमनं तथा ।
नमस्कारं च विस्तारमुपसंहारमेव च ॥४८॥

बहिरङ्गभूताचारानुष्ठानादेर्भिन्नत्वेऽपि ; चक्रवृत्तिः = चक्रस्य निरुक्ततत्तदर्थबोधकता न भिद्यते = नान्यथा भवति सर्वधर्माणां यथाकथञ्चित् चक्रोपमत्वोपपत्तेरिति भावः । स्पष्टमन्यत् ॥ ४१—४६ ॥

राष्ट्रीय-ध्वजव्यञ्जितस्यार्थस्योपवर्णनमुपसंहरन् तस्य विविधजनमनोऽनुकूलार्थोपस्थापकत्वं दृष्टान्तेन दर्शयति तद्धर्मचक्रमिति । यथा निर्गुणं ब्रह्मतत्त्वं श्रुतिप्रसिद्धं तदुपासकानां मनोऽनुकूलं यथास्यात्तथा, सरूपं = साकारम् ; सगुणं च सत् ; माययेतिशेषः, भाति = प्रकाशते "उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पने"ति स्मृतेः ; तथैव तद्धर्मचक्रं = पताकागतं धर्मस्वरूपव्यञ्जकं चक्राकारं चिह्नं ; जनचित्तबद्धं = जनानां चित्ते ज्ञानविषयतया सम्बद्धमथवा सर्वजनानां रुचि-संस्कृतिसङ्गतं सत्, तन्मनोऽनुकूलं यथास्यात्तथा आवर्त्तते = तदभिमतं धर्मात्मकमर्थमुपस्थापयद् वर्त्तत इत्यर्थः ॥ ४७ ॥

इदानीं ध्वजस्योत्थापनाभिवादनादिविधिं समासेनाह उत्थापन-



राष्ट्रशासनसंस्थासु गृहेष्वायतनेषु च ।
कार्यालयेषु सर्वेषु रङ्गदेवालयादिषु ॥४९॥
देशरक्षाविभागेन सेनाध्यक्षमतेन च ।
निर्दिष्टेनैव विधिना कुर्यात् श्रद्धान्वितः सदा ॥५०॥

अथ राष्ट्रपतिपताकार्थवर्णनम्

ध्वजे राष्ट्रपतेर्वस्त्रं नीलं रक्तं च वर्णतः ।
ऐशान्यां दिशि नीलाभचतुष्कोणस्य मध्यगम् ॥५१॥
मुद्राचिह्नं तु राष्ट्रस्य वायव्यां लोहितं तथा ।
चतुष्कोणं तु तन्मध्ये तुलादण्डं प्रतिष्ठितम् ॥५२॥
नैर्ऋत्यां वर्णतो नीले चतुष्कोणे व्यवस्थितः ।
घटः पल्लवसंयुक्तः सपुष्पो मङ्गलावहः ॥५३॥
आग्नेय्यां लोहितस्यैव चतुष्कोणस्य मध्यगः ।
चलन् प्रमत्तमातङ्गस्तेषां व्याख्यानमुच्यते ॥५४॥
मुद्रातत्त्वं तु प्रागुक्तं यत्तदत्रापि चिन्तयेत् ।
न्यायसाम्यं शासनेषु तुलादण्डेन सूच्यते ॥५५॥

मित्यादिभिः त्रिभिः । सेनाध्यक्षमतानुसारिणा देशरक्षाविभागेन निर्दिष्टो योविधिस्तदनुसारेणैव ध्वजस्योत्थापनादिकं कुर्यात्, न तु स्वेच्छया यदा कदाचिद् यथा कथं चिद्वेति भावः ॥ ४८—५० ॥

राष्ट्रपतेर्योध्वजोऽस्ति तस्य स्वरूपं व्यञ्जितार्थं च प्रसङ्गादाह ध्वजे राष्ट्रपतेरित्यादिभिरष्टाभिः । चतुष्कोणे = चतुष्कोणमण्डले । मुद्रार्थो

सपल्लवघटाज्ज्ञेयं मङ्गलं जनतागतम् ।
हस्तिना वश्यता नीतेरस्खलद्गतिरेव च ॥५६॥
चतुष्कोणैः सामदानभेददण्डाश्च नीतयः ।
राष्ट्राधिपस्य यत् कार्य्यं प्रभावश्चात्र चिन्त्यते ॥५७॥
प्रजानुरक्तीरक्तेन त्याग उत्साह एव च ।
नीलेनाकाशवत्सर्वशरण्यं महिमा तथा ॥५८॥

—०—

यथा प्राग्वर्णितः स एवात्रापि ग्राह्यः । तुलादण्डस्य साम्यं, सपल्लवघटस्य मङ्गलार्थत्वं, गजस्य वश्यतास्वभावः, तद्गतेश्चास्खलनं लोकप्रसिद्धमतस्तेषां तत्तदर्थव्यञ्जकत्वं युज्यते ॥ ५१-५६ ॥

चतुष्कोणमण्डलचतुष्टयैर्व्यञ्जितमर्थमाह—चतुष्कोणैरिति। सामादिदण्डान्ताश्चत्वारउपाया व्यज्यन्त इति भावः। सामाद्युपायानां लक्षणप्रयोगादयो संक्षेपेण प्रागुक्ता राजशास्त्रात् महाभारतादितश्च विस्तरेणावगन्तव्याः ; विस्तरभयान्नेह व्याख्यायन्ते। राष्ट्राधिपस्य = राष्ट्रपतेः यत्कार्यं = मुख्यं कर्त्तव्यं तथा तस्य यादृशो महान् प्रभावः एतद्द्वयमत्र = राष्ट्रपतिपताकायां चिन्त्यते = वर्णद्वयेनावगम्यते इत्यर्थः ॥ ५७ ॥

रक्तवर्णेन प्रजानुरागः, त्याग उत्साहश्चेति राष्ट्रपतेः कर्त्तव्यतया व्यज्यन्ते ; नीलवर्णेन तु राष्ट्रपतेराकाशोपमं सर्वेषामाश्रयदातृत्वमौदार्यं महत्त्वं चेति प्रभावो व्यज्यते इत्येतदाह प्रजानुरक्तिरिति। सर्वे श्लोका अतिरोहितार्था नाधिकं व्याख्यानमपेक्षन्ते ॥ ५८ ॥

अथ राज्यपालपताकावर्णनम्

पताका राज्यपालानां गैरिकी मुद्रयाङ्किता ।
नीतेः साम्यं तु वर्णेन व्यज्यतेऽन्यत्तु पूर्ववत् ॥५६॥

अथ सैन्यविभागीयपताकावर्णनम्

सैनिकानां ध्वजे रक्तवर्णे संहतमध्ययोः ।
द्वयोः कृपाणयोः सन्धौ मुद्राचित्रं व्यवस्थितम् ॥६०॥
आत्मत्यागस्तथोत्साहो देशरक्षार्थमिङ्ग्यते ।
रक्तवर्णेन, तत्स्थाभ्यां कृपाणाभ्यां तु यत् शृणु ॥६१॥
पराक्रमश्च सैन्यानां युद्धे चाप्यपलायनम् ।
उभाभ्यामुच्यते मुद्राकल्पः प्रागेव वर्णितः ॥६२॥

राज्यपालानामपि पताकायाः स्वरूपं तद्व्यञ्जितमर्थं च संक्षेपेणाह, पताका राज्यपालानामिति । मुद्रया=पूर्वोक्तलक्षणया राष्ट्रीयमुद्रया । स्पष्टमन्यत् ॥ ५६ ॥

सेनाया ध्वजस्य स्वरूपं तत् सङ्केतितं चार्थं समासेन ब्रूते सैनिकानामित्यादिभिस्त्रिभिः । तेषां पताका वर्णेन रक्ता ; तत्र संहतमध्यौ= संलग्न मध्यभागौ द्वौ कृपाणावङ्कितौ स्तः । तयोः कृपाणयोः सन्धिस्थानस्योपरि राष्ट्रीयमुद्राचित्रमङ्कितमास्त इत्यर्थः ॥ ६० ॥

देशरक्षार्थमपेक्षित आत्मत्याग उत्साहश्चेति द्वयं रक्तवर्णेन इङ्ग्यते= व्यज्यते । तत्राङ्किताभ्यां मिलितमध्याभ्यां कृपाणाभ्यां यद् व्यज्यते तच्छृणिवति सम्बन्धः ॥ ६१ ॥

प्रतिज्ञातमर्थं ब्रूते पराक्रमश्चेति । एतद्द्वयं कृपाणयुगलेनोच्यते=

अथ सैन्याध्यक्षप्रधानपताकावर्णनम्

सैन्याध्यक्षप्रधानस्य पताकाऽपि च वर्णतः ।
रक्ता दधाति राष्ट्रस्य पताकां लाञ्छनं तथा ।।६३।।
कृपाणयुगलं चैव तत्र संहतमध्यमम् ।
एषामर्थास्तु पूर्वोक्ताः स्मर्त्तव्याः साधुभिः स्वयम् ।।६४।।
यथा चित्रतुरङ्गस्य गमकत्वं विदुर्बुधाः ।
प्रत्यायकत्वमेतेषु तथा मुद्रापताकयोः ।।६५।।

प्रत्याय्यत इत्यर्थः मुद्राकल्पः = मुद्रार्थः प्रागेव यो वर्णितः स एवात्रस्थ-मुद्रयाऽपि व्यज्यत इति बोद्धव्यम् ॥ ६२ ॥

सैन्याध्यक्षप्रधानस्य पताकायाः स्वरूपमाह सैन्याध्यक्षप्रधानस्येति । सा वर्णतो = वर्णेन रक्ता ; राष्ट्रस्य पताकां = पूर्वोक्तलक्षणं राष्ट्रीयपताका-चित्रम् ; तथा लाञ्छनं = मुद्राचित्रं च दधाति ॥ ६३ ॥

तथा संहतमध्यमं कृपाणयुगलमपि तत् पताकायां चित्रितमास्त इत्याह कृपाणयुगलं चेति । एषां = सैन्याध्यक्षपताकास्वरूपघटकानां रक्तवर्ण-राष्ट्रीयपताका-राष्ट्रीयमुद्राणां संहतमध्यस्य कृपाणयुगलस्य चार्थाः प्रागेव वर्णिता अत्रापि स्मर्त्तव्या इति न पुनः कथ्यन्त इत्यर्थः ॥ ६४ ॥

ननु मुद्रापताकयोर्निरुक्तार्थबोधकत्वं यदुक्तमेतावता प्रबन्धेन तत्र युज्यते प्रसिद्धप्रमाणेष्वनन्तर्भावादप्रमाणस्य च प्रत्यायकत्वासम्भवादिति शङ्कां निराकुर्वन्नाह यथाचित्रतुरङ्गस्येति । गमकत्वं = तुरङ्गविषयक-यथार्थबोधजनकत्वम् । एतेषु = निरुक्तेष्वर्थेषु ; विषयतायां सप्तमी । अयं भावः--तुरङ्गचित्रदर्शनात्तुरङ्गबुद्धिर्जायत इति सर्वेषां प्रमातॄणां साधारणजनानां च स्वानुभवसिद्धं न प्रसिद्धप्रमाणानन्तर्भावमात्र-वाचोयुक्त्याऽपलपितुं शक्यम् । अतएव प्रमाणविदस्तादृशज्ञान-

सङ्केतेनार्थधीः सिद्धा लोके सर्वत्र दृश्यते ।
तस्मान्मुद्रा-पताकाभ्यामर्थो नो नावगम्यते ॥६६॥
क्षुद्रबीजे यथा वृक्षो यथा चित्तगतो महान् ।
हिमवान् तद्विदां भाति योगिनां हृदये विभुः ॥६७॥
तथैतद्भारतं वर्षं समग्रं तत्त्ववेदिनाम् ।
पताकायां च मुद्रायां भासते नात्र संशयः ॥६८॥

स्यानुमानेष्वन्तर्भावमुपपादयन्ति । तथैव मुद्रापताकयोरपि यथाकथञ्चित तत्तदर्थेनाविनाभावं गृहीत्वा तज्जन्य-तादृशज्ञानस्यानुमान एवान्तर्भावोऽभ्युपगन्तव्य इति ॥ ६५ ॥

आधुनिक-सङ्केतसामान्यात्ताभ्यां निरुक्तार्थानुमानमुपपादयति सङ्केतेनेति । आधुनिकसङ्केतेनाप्यर्थावगतिः सर्वलोकप्रसिद्धा कांस्यध्वनिलिङ्गेन समयमानानुमानदर्शनात् । लोकप्रसिद्धं हि परीक्षकैर्युक्त्या प्रतिपादनीयं न तस्य युक्त्याभासेनान्यथाप्रतिपादनं युज्यते तदुक्तं भगवद्भट्टपादैः—

"सिद्धानुगममात्रं हि कर्त्तुं युक्तं परीक्षकैः ।
न सर्वलोकसिद्धस्य लक्षणेन निवर्त्तनम् ॥" इति ।

तथैव मुद्रा-पताकास्वरूपलिङ्गेन निरुक्तानुमानमुपपद्यत एव ; मुद्रापताके तत्सङ्केतितार्थधीसाधनं सङ्केतत्वात् समयमानज्ञापकघण्टाध्वनिवदित्यनुमानादिति भावः ॥ ६६ ॥

"यथ तद् भारतं वर्षं मुद्रायां निहितं ब्रुवे" । इति प्रतिज्ञातमर्थमुपसंहरन् दृष्टान्तेन प्रतिपादयति क्षुद्रबीजे यथेत्यादिद्वयेन । यथा क्षुद्रबीजे निहितो महान् वृक्षस्तद्विदां = तत् सद्भावज्ञानवतां मनसि भाति = ज्ञानविषयो भवति ; यथा च तद्विदां = हिमालयज्ञानवतां चित्तगतः = चित्तेसंस्काररूपेणावस्थितः ; महान् = विशालकायो, हिमवान् = हिमालयपर्वतः भाति = तत् संस्कारोद्बोधकाले स्मृतो भवति ; यथा च

एवं समाम्नायमनामयं सतः
राष्ट्रीयमुद्राध्वजयोः प्रयत्नतः ।
सम्यक् पठित्वैव नरो यथार्थतः
ज्ञात्वा भवेद् भारतराष्ट्रतत्त्ववित् ॥६९॥

निखिलभुवन एकं धर्मचक्रं चकास्तु
क्वचिदपि जनमध्ये दुःखभाक् कोऽपि मास्तु ।
जगति सकललोकाः प्रीतिमन्तो भवन्तु
जय जय जय वादं सर्व एव ब्रुवन्तु ॥७०॥

योगिनामल्पपरिमाणे हृदये विभुः=सर्वव्यापी परमात्मा भाति=समाधि-काले प्रकाशते : तथैव विशालं भारतवर्षमिदं समग्रमेव पताकायां मुद्रायां च चित्ररूपेणावस्थितं तत्त्ववेदिनां=भारतवर्षविषयकयथार्थज्ञानवतां चित्ते भासते=प्रकाशते ; इत्यत्र संशयो नास्तीत्यर्थः ॥ ६७-६८ ॥

ग्रन्थपाठफलमाह एवमिति । सतः=सज्जनस्य सम्बन्धि सत् ; अनामयं=दोषरहितं यथा स्यात्तथा ; दोषः सन्नपि गुणग्राहिभिः सज्जनैर्न गृह्यत इति हृदयम् । राष्ट्रीयध्वजमुद्रयोः समाम्नायः=स्वरूप-प्रकाशकमिदं वचनजातं ; प्रयत्नतः सम्यक् पठित्वैव तदर्थं जानीया-दितिशेषः । एवं यथार्थतो ज्ञात्वा नरः, भारतराष्ट्रस्य तत्त्वविद् भवे-दित्यन्वयः ॥ ६९ ॥

अस्य धर्मचक्रस्य समग्रभुवनव्याप्तिं तत्फलं चाशंसन्नुपसंहरति निखिलभुवन-इति । चकास्तु=दीप्यतु । इदमेकमेव धर्मचक्रं समग्र-भुवने प्रवर्त्तितमस्त्वित्यर्थः । तेन किं स्यादित्यत आह क्वचिदपीति । आशिषि सम्भावनायां वा लोट्प्रयोगः । ततश्च जनसमाजे क्वचित् स्थाने कोऽपि जनो दुःखभागी न भवेदित्यर्थः । केवलं दुःखाभाव एव स्यादिति न, अपितु जगति=जगद्वासिनः सकललोकाः=सर्वे जनाः

पूर्वाशालास्यहास्योज्ज्वलमतुलयशोभूषणं भारताख्यं
वर्षं हर्षप्रकर्षाद्रचितमिव दिवः सारमुद्धृत्य धात्रा ।
तस्यैवास्त्येष देशः प्रकृतिरिव भुवः कामरूपोऽभिरूपः
तस्मै तज्जेन सेवार्थमिदमुपहृतं श्रीमनोरञ्जनेन ॥७१॥

इत्यौपमन्यव-चतुर्भुजमिश्रवंशोद्भवस्य श्यामदेवभोगेश्वरीसूनो
र्गुरुगणचरणारविन्दप्रसादलब्धशास्त्र्युपनाम्न आचार्य
श्रीमनोरञ्जनशर्मणः कृतौ पताकाम्नाये पताका-
व्यञ्जितार्थवर्णनमुत्तरार्द्धं समाप्तम् ॥

प्रीतिमन्तः=सुखिनः, परस्परं प्रेमयुक्ताश्चेत्यर्थः, प्रीतिशब्देन श्लेषादुभयोरुपस्थापनात् "प्रीतिर्योगान्तरे प्रेम्णि स्मरपत्नीमुदोः स्त्रियामि"तिकोषात्। अपिच किं स्यादित्याह जय जयेति। सर्व एव जना आत्मनो जयशब्दवाच्यमभ्युदयमुपेत्यापि, तेन सहैव वाऽन्यस्य जयमिच्छेयुरिति भावः ॥ ७० ॥

जन्मभूमेः प्राशस्त्यं माहात्म्यं चोद्घोषयन् ग्रन्थमुपसंहरति पूर्वाशेति। पूर्वाशा=प्राचीदिक्, तस्या यल्लास्यमानन्दनृत्यं तत् हास्यं च ; ताभ्यामुज्ज्वलं दीप्तिमत् मनोहरम् ; अतुलं यशोभूषणं यस्य तत्तादृशम् ; भारताख्यं वर्षं धात्रा=विधात्रा हर्षप्रकर्षाद्=उच्चलितानन्दोल्लासाद्धेतोः ; दिवः=स्वर्गस्य सारमुद्धृत्य=उत्कृष्टमुपादानं संगृह्येव रचितं=निर्मितम्। अनेनास्य स्वर्गलोकादप्युत्कर्षो ध्वन्यते। तस्यैव =भारतवर्षस्यैव देशः=अंशविशेषभूतः ; एषः=प्रत्यक्षीभूतः, भुवः प्रकृतिरिवाभिरूपः=समग्र-पृथिवीगत-प्राकृतिक-वैचित्र्यशालित्वात् पृथिव्याः प्राकृतिक-शोभेव मनोरम इत्यर्थः। कामरूपः=कामरूपाभिधान, इदानीमसमनाम्ना ख्यातोऽस्ति। तज्जेन=भारतांशभूतकामरूपजन्मना श्रीमता मनोरञ्जनाख्येन कृतिना ; तस्मै=भारतवर्षाय

तद्देशवासिभ्य इति यावत् ; सेवार्थं=सेवैवार्थः प्रयोजनं यस्य तत्तादृशं प्रकरणमिदम् ; उपहृतम्=समर्पितम्। देशवासिनां सेवैवैतद्ग्रन्थरचनायाः प्रयोजनं नान्यदिति हृदयम् ॥ ७१ ॥

ग्रन्थकृदात्म परिचयेन ग्रन्थसमाप्तिमुद्घोषयति इतीति ॥

नारायणाच्च रघुनाथशिरोमणेश्च
बाल्ये पितुश्च सुरवाचि गृहीतदीक्षः ।
ज्ञात्वागमस्मृतिमतं शिवनाथपादात्
नारायणार्यचरणादथ भट्टपल्ल्याम् ॥
वैयासिकेऽथ समये सहजैमिनीये
सांख्ये च गौतमनये सुगतादितन्त्रे ।
योगेन्द्रनाथचरणाश्रयलब्धबोधः
प्रीत्यै सतां स्वरचिते विवृतिं व्यतानीत् ॥

इत्याचार्य श्रीमनोरञ्जनशास्त्रिकृता
जनमनोरञ्जन्याख्या स्वकृत-
पताकाम्नायस्य संक्षिप्ता
व्याख्या समाप्ता ॥

समाप्तोऽयं ग्रन्थः ॥०॥

श्रीभगवदर्पितोऽस्तु ॥०॥